वा ऽ३ न्तो ऽ३ म्रा । औ हो स दा ऽ३ दो ऽ३ हा ॥ ॥ पर्जन्यः पि तो ऽ३ म्रा । हि षा ऽ३ स्या ऽ३ । पर्णि नो ऽ२३

४५ पः । नो नो ऽ थि वी ऽ३ गो । यि । रि श्र ऽ३ हो ऽ३ । यि न्त धो ऽ२३४ पे यि । स्व सो र ऽ३ औ । पो ऽ३ औ ।

नि गा ऽ३ ह ऽ३ त । औ हो स रो ऽ२३४ पे नः । स हुवा । वनि र्वि ऽ३ सो । त वा ऽ३ यि त ऽ३ । औ हो वा ऽ३ र ऽ३ का

॥ ॥ कविर्विधस्यो ऽ३ पो । रि या ऽ३ यि षी ऽ३ । मो हि नो ऽ२३४ पे म्रा । औ हो त्यो न म्रा ष्टो ऽ३

औ । नि वा ऽ३ डो ऽ३ म्रा । औ हो र्ष सो ऽ२३४ पे यि । औ हो प स ध न्वा ऽ३ रो यि । तो । सो ऽ३ मो ऽ३ । नो

म्र डो ऽ२३४ पे । हो ऽ३ हो । वा ऽ३ हो यि । ह्र तो व सो नः ऽ३ पो । रि या ऽ३ सी ऽ३ । नि र्णि डो ऽ३ म्रा

ऊ वा३४५॥ ॥ ॥ ॥आयन्तीबृहतीन्द्रः॥ ॥आयन्तीयम्॥ ॥आयन्त इव सू

१रा याम्। विश्वेदिन्द्रारस्यैनारक्षा ता। वासू निजोताऊ नि मा। नियो

जो१सार। प्रतिनागन्नदीरधिमः। प्रा२३ती। नागान्नो२दो। कुम्। धिमा३ः। उ२३४

वा॥ ॥प्रतिनागन्नदा१यिधायिमाः। प्रेतारयिनागारम्। नेदारयिधेयिमाः।

ओलर्षिरीति वसुदाम्। उपोस्ते१हारयि। नद्वाइन्द्रस्यरातयः। नो२३ द्वोःइन्द्रा

स्यो३रो। कुम्। तयो३ः। उ२३४वा॥ ॥नद्वाइन्द्रस्यरा१तायोः। नेद्वा२इन्द्रारास्यै

रा२तोयाः। याऽऽस्य कामेविधतः। नारापोतारयिमेनादोनायवादेयन्नामो

९२

८२

अच्छावाकसाम॥

२३नोः। देनायोऽ२श्चो। कुमा देयाऽ२। उऽ२३४वा। हुऽ२३४५॥ ॥ए॥ ॥वसिष्ठ।

बृहतीन्द्रः॥ ॥समन्तम॥ ॥यतइन्द्रभयामहायितातानोअभ्ना नयङ्कृधा

यिमघवाऽ२३च्छग्धो। ग्धयितवेतन्नानऊतायो। औहोऽ२३४वाहोयि। विद्वायि

षोऽ२३वीऽ३। होवाऽ२हायिम्रा। धोजाऽ२३होऽ२३४ऽ३यि॥ ॥विद्विषोविम्रधोजहायि।

विद्विषोवायिम्रोधोजहायि। उवऽ६हाऽ२३यिरो। धासस्पातरो। धासोमाहो।

औहोऽ२३४वाहोयि। द्वो। यास्याऽ२३सीऽ३। होवाऽ२हायि। विधोऽ२३तोऽ३४ऽ३। ह्वय

स्यासिविधतो। ह्वयस्यासीविधत्तोत ह्वोवाऽ२३योमामोघवेन्ना। इगोयिवोए॥

औहो३४वाँहोयि। स्तु। ता। वा२३ं। ओ३॥ होवा३हो। यि। हवाँमा२३ होऽ३४३यि। त्तु२३४५इ। डा॥ ॥१०॥

॥नवमार्भविः॥

॥ऋष्यस्यद्वितीयगोयत्रीसामः॥ ॥आश्यस्यकाम॥ ॥

२२०३र ४ ५ ... ओ। औहोवा होयि। उवा६। सोमा। सिं। धोरयुः। एहीयिही १। मान्द्रार्तेडि। ष्ठा ओ। धा२रा। एहीयिही१। प्रति आ२रयि। पो। वा२ श्वो। मा२। हयत्। रा२। रेयो२३४ औहोवा॥ ॥

ओ। औहोवाहोयि। उवा६। स्तुता। मेदो। यि। तमः। एहीयिही१। दोधन्वाँन्मत्स रोयि। न्त्तमंमः। एहीयिही१। आ२रयि। ओ। यिन्दू२रसा। त्रा२। डिदा। स्ता२रेतो२३४ औहोवा॥ ॥ओ औहोवाहोयि। उवा६स्तु। ष्वा। णो ओ। द्रि। तिः। एहीयिही१। ओ।

नियँषकनोयि क्को दत्वा। ए हीयिही १। आरयि। घ्रूमारन्तो ७ स्स्रा। ष्मर्मा॥ नारेरौ

२३४ औहोवा। स्तु क्को औ क्रुतोर२३४५ः॥ ॥११॥ ॥ शम्मदाद्धिः रसो गायत्रीसामः

॥ ॥ शम्मदम॥ ॥उवं ७ सोमा सिए। हीए हीर२३४ या। धारयु रर हीएर हीरे

या। मेन्द्र उजिष्ठाच्चद्वराएर हीएर हीरे या। पावास्वा मोर२३२ हासोर२३४वा।

रौंपायाह हायि॥ ॥उवं ७ सुतामाएँ। हीएँ हीर२३४ या। दिन्त्रमाएर हीएर हीरे या।

देध न्वौन्मत्सरिन्त्रमाएर हीएर हीरे या। आयिन्द्रू सात्रो१२३। जिदोर२३४

वा। स्त्वापर्तीह हायि॥ ॥उवं ७ सुष्वाणाएँ। हीएँ हीर२३४ या। ऋद्धिनार२ हीएर

हो३ यी। ओ नि यर्षक नि क्रा दादि२ होए२ हो३ यी। ध्यू मान्ना ७ श्व३१२३। षोमो

२३४ वौ। न्ना पराद् होयि॥ ॥१२॥ ॥ दावसुराङ्गिरसो गायत्री सामः॥ ॥ दावसु

निधनम्॥ ॥ उ वे ७ सो२३ मा सिधारयु हो जा। मा न्द्र उ ङि। ष्ठो आ हा१२२३यि।

हो वो३ हो यि। पै वा स्वो१मा२३। हो वो३ हो। हयेता रा रेयो२३४ औ हो वा॥ ॥

उ वे ७ स्व२३ ता मदिन्ता मो हो जा। दो धन्वो न्मा सरो यिन्तो१मा२३ः। हो वा

३ हो यि। इन्द्र स्सो। त्रा२३। हो वा३ हो। जिदा स्ता रे तो२३४ औ हो वा॥ ॥ उ वे ७ स्व

२३ ष्वा णो। अद्विनि हो जा। ओ नि यर्षा। क नोयि क्रो१दा२३ ता। हो वो३ हो यि। घो

९४

मा न्त्वो १ ७ स्थूर३ । हो वा ३ हो । ष्णमा । नारे रा २३४ औ हो वा । ए३ । दा व सू २३४ पा ॥

॥ ॥१३॥ ॥ काशीतो गायत्री साम: ॥ ॥ प्रतीचीने डङ्कुः शीतम् ॥ ॥ वे ७ सोमा

सिधम २र यूः । मा न्द्र ३ कि । ष्टोओ हुरा २३४ यि । हा हो यि पिव स्वमा ७ हो इ या

ता र योयिः । अ र३ हो वा ॥ ॥ वे ७ सु तो मे । दा र यिन्त मोः । दा धन्वो न्मा । सरो यि

न्तेमा २३४ः । हा स्रो यि । इ न्दुस्स त्रा डी ३ दोः । स्नुतो । अ ३ हो वा । वे ७ सुष्वा णाः ।

ओ र द्वि नो यिः । आ नि यर्षा कनो यि । क्र दा २३४ ता । हा हो यि । द्यो मन्त ७ स्रष्मा

३ मो । न रो । अ ३ हा हो वा । ई डा ॥ ॥१४॥ ॥ हविष्कृन्नायत्री साम: ॥ ॥ हा विष्कृतम् ॥

वे ८ । सो मो सि धा हो ऊ रो यु म न्द्रे डा यि । ष्टो आ ह्वा र ३ रो यि । प वा र हा १ ।
स्वा र ३ मो । ह ये त । रा रि यो र ३ ४ औ हो वा ॥ ॥ वे ७ सु तां म दो हो ऊ न्तो मोः । द धे
न्वां मा । त्स रि न्ता र ३ मोः । इ न्द्र रा हो १ यि । सा र ३ ञ्चो ॥ क्रि दे । स्ता रे ते रि ३ ४ औ हो
वा ॥ ॥ वे ७ सु ष्वा ण ओ हो ऊ ह्वो यि नो यिः । अ नि य षी क ऽ नि क्रो र ३ दो त ।
द्धू मा रा हा १ । ता र ३ ८ श्रे षा म मो । न रि रो र ३ ४ औ हो वा । दे वि ष्ठे ते र ३ ४ ५ पे ॥ ॥ २५ ॥ ॥ ।
सु प र्णः क कु प्सा मः ॥ ॥ स्वा र सो प र्ण म् ॥ ॥ वे ९ द्यु ह्नः दि वा ३ या । प वे मा न ऊ
नि मो नि द्यु मो । द्वे म्रा । ता र ३ ४ मोः । आ मो ३ ऊ वा । तो त्वा । ये । घो र ३ ४ वो । षो पा या

95

९५

६ हाउयि॥ ॥ ऊमृतत्वाँ याघाषा२यौ न्रायनानवग्वाद हुँ हुः पाकुे मृ१ण

२३४ ताउयि। यौयिनो३ ऊ वो। विप्रौ। सेते२३४ वा। पापयिरा६ हाउयि॥ ॥यैन

विप्रौस ऊँपा३यिरोयि। दैवो नो ८ सुम्न ऊमृ तस्य वो। कुे मृ। स्ते२३४ णोः।

यौयिनो३ ऊ वो। श्रवो। सियो२३४ वा। शौ। पाता६ हाउयि॥ ॥१६॥ ॥विश्वमना

उ ष्किं। कुसामः॥ ॥विश्वमनसम्॥ ॥पवस्वादैववीता२यौयि। औ यिन्द्रा

धौरारे। निरा३४५। ऊ स ऊँ कलेशोम्मे धुमा न्कसार२३४ पो मैनारः॥ सोदारे ऊँ

२३४ औ ह्वावा॥ ॥तेवद्द र्ष्मा उदप्पू३तोः॥ औ यिन्न्द्रे मेदारे। यै वो३४५। हे धु

रा त्वा न्द्रि वा सा अ म्हे ता२३४५ पाये कारम्। पोप्रे रो२३४ औहोवा॥ ॥ औं नस्सु

तो सइ न्द्रा३ वः। इनानां धरि वे ता२३४५ पारे यि मा वे ष्ठि द्या वा री त्यो पो२३४

पेः। स्तु वा रः। वा यि दा रि औ२३४ औहोवा। ऊ२३४५॥ ॥१७॥ ॥गौरीवितिरनु

ष्टुप्साम॥ ॥महागौरीवितम्॥ ॥परि त्यं ६ हा३। र्यत ७ हरा यि म्। बभ्रुम्पु

नन्ति वा रे णा२३। यो दे वा न्वा३१२३ यि म्बो ७ आ पयित्परा यि मा दनसा

३१२३। हगा वा। औ पा ता ६ हा यि॥ ॥द्वि र्यं मा पे ञ्चो३। स्वयशसा मां सखा

यो३ अद्रि स६ ह ता२३ म्। प्रो यमि न्द्रौ३१२३। स्य का प मि या म्। प्रो स्ना प यो३१२३।

96

९६

तंउवा । माँपयाइहाँयि ॥ ॥इन्द्रो । यैसोऽ२ । मंपाँतँवायि । हे त्रा । गिन्न परि षिच्यसा

२३यि । नोरैंच दो२१र२३ । न्हिं णापवनायि । वोयिरौंयसा२१र२३ । दैनावाँ । सोपादा

इहाँयि ॥ ॥१८॥ ॥वसिष्ठस्याऽनुष्टुप्साम: ॥ ॥निहवम् ॥ प्रस्ताव ॥ओ । यिही२ । ओ

यिही । एहियो । उ२३४वा । हायि । निधन प्रस्ताव परित्यऽ६ हर्य्यतऽ२६ हो रा२यिम्रा । हो रोयि

म्रा । हरो । उ२३४वा । हायि । निधन उद्गीथ बभ्रुम्पुनन्ति वाँ२र । णा२ । र णा । र णा । उ२३४वा ।

हायि । प्रति हार याद वान्विश्वऽ६इऽ३ स्या रा२यि । पोरो यि । परो । उ२३४वा । हायि ।

उपद्रव मादनसहगऽ३ ठो ता२यि । ठो तोयि । ठेतो । उ२३४वा । हायि ॥ निधन ॥ द्वियम्मा

स्वयऽ३ श्रो सो३म्। श्रोसोम्। श्रोसो। ऊ२३४वा। होयि। सर्वा यया ऽद्रिसऽ२ऽ।
होतो३म्। होतोम्। होतो। ऊ२३४वा। होयि। प्रियमिन्द्रस्य कोऽ२मोया३म्। मोयो
म्। मियो। ऊ२३४वा। होयि। प्रस्नो पयन्त ऊ२मो यो३ः। मोयोः। मेयो। ऊ२३४वा।
होयि॥ ११ इन्द्रायासोम पा२ता वो३यि। तोवोयि। तेवा। ऊ२३४वा। होयि। हे त्वाऽघ्न
परिषिऽ३च्यो सो३यि। च्योसोयि। च्योसो। ऊ२३४वा। होयि॥ नारञ्च दक्षिणा२वो
तो३यि। वोतोयि। वेता। ऊ२३४वा। होयि। वीराय सदना३सा दो३यि। सोदोयि।
सदो। ऊ२३४वा। होयि। ओयिही३। ओयिही। एहियो। ऊ२३४वा। हो३४। औहो

वा। ई२३४पे॥ ॥२०॥ ॥अग्निरनुष्टुप्सोमः॥ ॥यद्वाहिष्ठीयम्॥ ॥परिप्रि

ऽहे ष्यैतऽ हरिम्। परिप्रियऽहा वा। यतेऽ हरायिम्। बभ्रु म्पूर२३नो। तिवा र

णा। याऽदेवार२३न्वौ यि। श्वाऽ३ इत्पराायि। मादेना२३सो। हगे च्छा२३ तो२३४ श्यि

॥ ॥द्वियं म्म्पञ्चस्वयशेसम्। द्वियं म्म्पञ्चा वो। स्वयेशासाम्। सखा। याा२३ यौ।

द्विसेऽहताम्। प्रियमा२३यिन्द्रो। स्यकौ मियाम्। घस्र्ना। पा२३यो। तकौ र्मा२३यो

३४३॥ ॥इन्द्रायेसोमपा तवा। इन्द्रा यसो वा। मपा तवायि। वृत्र ग्घ्ना२३यिपो।

रिषि ञ्च्युसायि। नारं चा२३दो। द्विर्णा वतायि। वीरायार२३सो। दनोसा२३दो३४३

यि। उ२३४५इ। डा॥ ॥२०॥ ॥इति ऊहगाने पञ्चमः प्रपाठकः॥ ॥७॥ ॥

॥ ॥ असितोऽनुष्टुप्सोमः॥ ॥ आमितम्॥ ॥ परि त्यौ३ हर्यतो यिम्। हरा

यिम्। बभ्रुम्पुनन्ति वारा२३ए। यादेवान्वारयि। सौ३इ त्सरा। यिमादे

नो सारा। हुं गो वा२ उ२३४ वा। औ३पाताइ होयि॥ ॥ द्वितीयम्पञ्चस्वैया॥ शासा

म्। सखायो। आ। अद्रिसौ३हा२३ तोम्। प्रोयार मोयिन्द्रोरा। स्यकोमिया म्। प्रास्ता

रंपोया। रा। तउ वा२ उ२३४ वा। औ३पयोइ होयि॥ ॥ इन्द्रायें। सोमपो। तवायि। वृत्र

ग्घ्नपरिषिच्यसा२३ सोयि। नोरा२ चोदारा। ह्ति। ए। वतायि। वायिरा२ योसारा। दानो

९८

वौ२ ३ओ२३४ वा। सो। ५ दो६ हायि॥ ॥१॥ ॥इन्द्रोनुष्टुप्सोमः॥ ॥साढ्रम्॥ ॥परिप्रिया
३५ हर्य्यतः हरा यिम्ना बभ्रूम्नुनोरे।ति वो३४५।रे२३४ णा।या।दे वो न्विश्श्वा ६ इ
त्पेरो२३४५ यि मा हा ओ२३४ वा।नो सो ओ२३४ वा।ह गा ५ च्छ ता यि॥ ॥द्वियुर्म्मपा
३ त्वे स्वयशा सोम्ना सेखा या ओरि।द्रि सो३४५।हो२३४ तो म्ना प्रियेमिन्द्रस्यका
मियो२३४५म्ना प्रो स्नो ओ२३४ वा।पो या ओ२३४ वा तऊपर्मयाः॥ ॥इन्द्रोयोरा सोम
पातवायि।ह्रे ज्वाङ्घ्रपारो रिषो३४५ यि।ज्यो२३४ सो।नेरे चेद क्ति णा वतो२३४५ यि।
वायिरा ओ२३४ वा।या सो ओ२३४ वा।दे ना ५ स दायि।हा ५ इ।डा॥ ॥२॥ ॥अकूपारः

नुष्टुप्सामः॥ ॥आकूपारमनादेशाम्॥ ॥परिह्यार२३८ हर्य्यात८हो२३४रायि

म्राबेन्नू२म्प्रुना। तिवार२णा। य्यादिवो न्वारयि। श्वौ८६ त्सेरायि। मादेनोसार२३ दा

२३ गाँ२३। औ२३४५ पाता६ हायि॥ ॥ द्विर्य्यम्पार२३ ञ्वैखायशोर२३४ सामासे खार्यो

आ। द्विस८हे ताम्। प्रियमो। यिन्द्रार। स्य कामियाम्। वेस्नापायार२३। तोर२३ औ२३।

मो२३४५ याया६ हायि॥ ॥ इन्द्रायार२३ सोमपातो२३४वा यिवेत्रार। ऽघ्नपा। रिषिञ्चोसा

यिनेरिचोदार। च्छिणावेतायिवीरायोसा२३। दो२३ना२३। सो२३४५ पादा६ हायि॥ ॥३।

अविभाग्यपदेइति मेनस्तोभेनप्रतिहारः। क्षिप्रतिहारं चेत्षष्ठेन चापंचा...

॥ ॥प्रजापतिरनुष्टारपङ्क्तिः स्सामः॥ ॥विधर्म्म॥ ॥ औहा२३वा। औहा२३वा। औहोरे

९९

वार२३४ऽ३हा३वा। पेव स्वासोममम। हि द क्रा यार२३४५। ऊ भ्रष्टस्वानेनि क्तो। वार ऊ ध

नोरेयार२३४५॥ ॥ प्रतिसोतारार सम्म दायार२३४५। पुनेनिन्त्रिसोमममो हि द्यो म्ना

यार२३४५॥ ॥ श्रिश्रुऽऊ ज्ञानेछहरिम्म्रे ऊन्नीर२३४५। पवित्रेसोमान्द्र वे ब्र्रे

इन्द्र र२३४५म॥ ॥ पेव स्वासोमार२३४५। म हि द क्रा यार२३४५। ऊ भ्रष्टस्वानेनि क्तो। र

वा ऊ धनोरेयार२३४५॥ ॥ प्रतिसोतारार२३४५ः। र सम्म दायार२३४५। पुनेनिन्त्रिसो

मार२३४५म। मो हि द्यो म्ना यार२३४५॥ ॥ श्रिश्रुऽऊ ज्ञा नाम्र। हरिम्म्रे ऊन्नीर२३४५।

पवित्रेसोमार२३४५म। द वे ब्र्रे इन्द्र र२३४५म। ऽ३हा३वा। ऽ३हा३वा। ऽ३हो रेवार२३४ऽ३

।हा५इ वा। ए३। विधर्म्मी२३४५॥ ॥४॥ ॥प्रजापतिर्गायत्रीसोमः॥ ॥स्कन्दम्॥ ॥

॥उपोषुजातम्। अप्तुरो वा। गोभिर्भङ्गम्। परिष्कृतम्। इन्दुन्देवा औ३ होवा

२३। सिषा। ऊ वा। सूधियार॥ ॥तमिद्वर्द्धन्तु नो गिरो वा। वत्सं ८ सं ८ शोयि। श्वरी

रिवो। यइन्द्रस्य हृदा२३म्। सनो ऊ वा। सूधियार॥ ॥अर्षा नस्सो२म। शं गवे वा

वा। धुक्षस्व पोयि। प्युषीमिषाम्। वर्द्धा समुद्रम्। क२३ उक्थियो ऊ वा। सूधियार। ए२३

हियो२३४३। ओ२३४५इ। डा॥ ॥५॥ ॥इन्द्रवाहगायत्रीसोमः॥ ॥ऐन्द्रवाहम्॥ ॥

आ घा यो अग्निमिन्धते। स्तृणन्ति बर्हिरानुषक्। ॥ ह्येहन्निन्दिद्राः। आयिषो

इतिवाप्र

नवमप्रपाठकस्य

१००

मा नृरि शास्त्र म्मृशुस्स्वरूः। ऽयुहुइ ह्वा धा वार्तमा म्हर ऽऔ डतिसत्व मा यिः। ये

षा मिन्द्रायुर्वांइ हा। ऊ वा यि। ऊ वा र३४। वा। सांपा रखा द्हा यि॥ ॥६॥ ॥त्रिकक्रु

बुष्णि गिन्द्रः॥ ॥त्रिककुभम्॥ ॥ यएकइद्धि दांयार तांयि वा सुमर्त्तायार दा।

कुमा स्ये र३४ षां यि। ऽऔ यि शां नां ऽप्रति ष्कुतः। ऽऔ यि षां। नां ऽप्र तां यि। ष्कूर

३४ ताः॥ ॥यश्चिद्धि त्वा बकु भ्या र ऽऔ सु तां वां ऽआ वी र वां। कु मा सों र३४ तां यि। ते

ऽऽये न्त त्प त्ये तशावेः। ऊ ऽऽयमा। ते त्प त्ये तां यि। शां र३४ वाः॥ ॥के दा मर्त्तम रां धार सा

मा पे दा ऊ कु म्पा मी र वां। कु मा स्फू र३४ रांत्वा के दान श्शु श्शु वद्धि रः। कां दों न श्शु श्शु

101

वोता। गा२३४यि रा:॥ आ यि न्द्रा आ। गोरि। यौ२३४ औहो वा। ई२३४ न्द्रा:॥ ॥
॥।७॥ ॥विश्वेदेवा अनुष्टुबिन्द्रः॥ ॥उद्भू८ शीयम्॥ ॥गायन्ति त्वागा
यत्रिणो औ। अर्चन्त्यर्कमर्का२३यिणाः। ब्रह्माणस्त्वा२ हा१ यि। शतक्रा
२३ तो। जा। उद्भू८ शामिवयो। यिमी श२। उद्भू८ शा२३४मी। वोयो२३ जवो३। उपु।
मो२ यिरा३५ होयि॥ ॥ये त्वामानास्सान्वारु है औ। दूर्यस्पष्ट कर्तूर२३ वोमातेदि
न्द्रा२ हा१ यि। अर्जुवे ता२३ तो यि। यूथेन वृष्णि रा२ यि जो३ तो यि। यूथेना
२३४ वृ। ष्णा यिरा३ जवो३ उपु जो२ ता३४ होयि॥ ॥युङ्क्ष्व हि केशिना हरी

१०१

औ।हषणां कक्षियार२३प्वौ। औहांनार।हो१यि।इन्द्रासोमार२३पौः।गिरामुप

श्रुता१यिऊन्वौ३रा।गिरामू२३४पा।श्रूतां३उवौ३।उपूवोरारो३४हाथि।। ।।

इति चित्रसोमाः।। अविवाक्यमिति द्वन्द्वमेसंज्ञां दर्शमेमे अहनि।। प्र१

।। ।।५।। ।।अऊी गागायत्रीसामः।। ।।आजिगम्।। ।।तेचातऊौ।तेमा

न्धसोः।दिविसऊ्।मोया१दार२३दोयि।ते आ८शामौ।मंहिश्रा२३वार

४३ः।। ।।सेनाआयिन्द्रो।येयाऊया वोयि।वेरुणाय।मोरुऊा२३योः।वेराथि

वावीत।परिस्रा२३वो३४३।एना वायिश्वो।नि आर्या आ।द्यो मन्नानिमो।नृषा२३

णाम्।सिषासान्ताः।वनोमा२३हो३४३यि।ऊ२३४५इ।ऊा।। ।।९।। ।।अनीका

ड्भिः रसो गायत्रीसोमः॥ ॥आनीकम्॥ ॥ ओ२३४ वा ते आपाता मो हा न्धसाः।
दिविसद्भूमियो। दो३दा। ऊ आ। शो२३४ मी। मा हा२ ऊ वा२३४३। ओ२३४५ वा ६ हायि
॥ ॥सो२३४ नइन्द्रापायवे। यो हा ऊ पा वायि। वेरुणाय मरू१ द्भ्या२ यो॥ दरि। वो२३४ वीत।
पोरा२ ऊ वा२३४३। स्तो२३४५ पा वा ६ हायि॥ ॥ ओ२३४ यिनो विश्वश्व वा ५। नियो हा यि आ।
ध्रेम्नानिमान्२१ षो२ णाम्। सिषो सो२३४ न्दोः। वो ना२ ऊ वा२३४३। मो२३४५ पा हा ६ हा
यि॥ ॥१०॥ ॥अङ्गिरो बृहतीसोमः॥ ॥उत्से धः॥ ॥६ नानस्सोम धारयापः।
वेसो२३४ आ हा वा। ना अर्षसो२ रयि। हा३ ऊ वा२३। ओ२३४ पा। आरा३ रत्न धा। आ हा

१०२

वाहौयि। यौंनिम्रेतो। स्येसीदासि। हा३१ऊवा२३। ऊ३४पा। उ। हंसो२ंदवः। औहो

वाहौयि। हिरा२ण्यंया। पयाद्६पुद्ः॥ ॥ उ। हंसोंदावा। हिरण्ययः। उ। ह्सः। दंवा३४औ

होवा। हिरण्ययाँरः। हा३१ऊवा२३। ऊ३४पा। हुंहो३नकः। औहोवा। हौयि। धेंदि

वियोमा। सैंधुप्यौयैमा। हा३१ऊवा२३। ऊ३४पा। त्रैनो३सैंधा। औहोवा। हौयि। स्तो

मा३सा। पदाद्६पद्ता। प्रत्नेः सधस्थमासदता। प्रत्नमासैंधा३४औहोवा। स्थैमासदा

रता। हा३१ऊवा२३। ऊ३४पा। आपा३र्किंयामा। औहोवा। हौयि। धेरुणोवा। जिय

षैसि। हा३१ऊवा२३। ऊ३४पा। नोना३यिधेतिः। औहोवा हौयि। विचा३र्कृणा। पणा

६५६॥ कारइ४५॥ ॥११॥ ॥अग्निर्वैश्वानरो बृहतीसामः॥ ॥यज्ञायज्ञीयम्॥

॥ ॥पुनानःपनः॥सोइमोर धारायो। ओपावसा।नोइ आषइसी। आरार ने धीयो

निम्। तस्यार३सो। कुम्माय। हाइसोयि। हाइसायि। कं हमादवाहि रारे स्ययो

जा। केसो॥ दोयिवा। हो३यि रो स्याइयो॥ दुहार नेके धर्हि वियम्मार३धू। कुम्मा

यि। प्राइयोम्। पोत्व ऽसधस्थमारे से दो जा। पो तोम्। सोधा। स्तोइमोसाइ दोत।

आपार श्रेन्धरुणम्। वाजाइ३या। कुम्मायि। षो३सोयि। दृनिद्वितो विचारे कोणो १०३

जा। वोइ४५॥ ॥१२॥ ॥अङ्गिरोबृहतीसामः॥ ॥निषेधः॥ ॥ तुनानस्सोमार३धारया।

औपोवेसा । नो । औषसारयि । इहाउ । औरा३ह्नो । धाः । हो । हा२३४हो । यो । निम्य

तो । स्वसीदो२३सो यि । इहाउ । ऊँ । औसा३दो यिवाः । हो । हा२३४हो । हिरा३स्याः ५

या६५६ः॥ ॥ ऊ ह्लसा दा वा हा३ यिर स्ययाः । उ ह्लसो दा वो । हिर स्ययारः । इहो

३ । दू हा३ना ऊँ । हो । हा२३४हो । धो दि वि यो मः । मधुप्लो२३यो मः । इहा३ । प्रोह्ला

३८ सा धा । हो । हा२३४हो । स्तोमा३सा ५ दा६५६त्॥ ॥ प्रह्ल ८ सधस्तो३मासदा

ता । प्रह्ला ८ सधा । स्तोमासदारता । इहा३ । औपो३र्को यामः । हो । हा२३५हो । धोरु

णोवो । डियषो२३सा यि । इहा३ । न्वैमो३यिषोताः । हो । हा२३४हो । विचो३क्वो ।

पणाइपइः। ह्विरे ३४५॥ ॥१३॥ ॥गौरीवितिस्त्रिष्टुप्सोमः॥ ॥महागौरीवित
म्॥ ॥ओं ओं। ओ वो ३ यिः। विप्रश्चे ताम्। मतीनाम्। सोमः पुनानो नाऽऽसदच्चमू
ष्व २३। सोपन्तियौ ३१२३ म्। मिथुनो। सो निकाम। मापद्व र्थ्यो। वौ र थिरो ३१२३ स
स्सौवौ। हौ पास्ताइहायि॥ ॥सपुनानोनो ३ः। उपस्सूरो। यि। देधानउभे नि ऽ अप्रा
रोदसीवीषः औ वा २३ः। प्रो यौ चिद्यौ ३१२३। स्य प्रियसौ सकृतीसापातो धानो
दूः रिणौ ३१२३ यि। नोप्सावौ। यौ। पउ सो इहायि॥ ॥सवाधिता ३। वर्द्धनः पूयेमा
नाऽस्सो मौ मीढूंडौ ऽ अ नि नो ज्ज्यौ। पातिषौ वा २३ यित। यो त्र नः हे ३१२३। वि पितरः पद

मैत्रावरुणसाम॥

ह्ना॥स्र॒५वर्धीयि।दो अत्तिगों३१२३॥ औह्वावा। औ५यिष्णा६हायि॥ ॥१४॥ ॥

मेधातिथिः पङ्क्तिर्बृहतीन्द्रः॥ ॥मेधातिथम्॥ ॥माविदन्न्यादोहोयि। विशाउ

८साता। सेखायारहाहोयि। मा अ३हो। रायिषोजवा। एयो। तोजवा। इन्द्र मिस्त्तो

तो ष्टषणा। अ३हो। सोचा जवा। स्तो तो जवा। मुकुरु क्काः। अ३हो। चशो। औहो।

वा। हा२३४वा। सा५ता६हायि॥ ॥मुकुरु क्कोः। होवि। चशो३८ साता। मुकुरु

रहा॥ क्का। अ३हो। चोशोजवा। सोतोजवा। एव क्को क्कि ए ष्टषभा। अ३हो।

योयौजवा। ऊ वो जवा। गोन्नचा। अ३हो। षणो। औहो। वा। हा२३४वा। सापा। हा६हायि

गाँन्नवो हौयि । षँणा ३ यि साँ हाम् । गाँन्नारहा १ यिवा अ ३ हो । षोणा ऊवा । सो हो

ऊवा । विह्वषणा ६ सद्वननमा अ ३ हो । नोयो ऊवा । कोरो ऊवा । मे ६ हिष्ठमा अ ३

हो । नयो । अ हो । वा हा २३४ वा । वा पयिनाइ हौयि ॥ ॥१५॥ ॥ प्रजापतिर्बृहती

न्द्रः ॥ ॥ अभीवर्त्तः ॥ ॥ उ हू ३ त्वायि र ३ मा धु मं त्त । मा वा । गो यिर स्ता मा । स अ यि रा १

तारयि । सो अजि तारा १ २ ३ ४ । धनसा अ त्विता । ता १ यारः । वा जो यो १ न्ता रः रथ्या

इः । ओर २३४ पयि । वा र २३४ पा ॥ ॥ वा जो ३ यो ३ न्तार थ्या इ वा । वा । वा ऊ य न्तः । र थ्या

आ १ यिवा र । को सर्वा इ वा ३ २३४ । न्नं गवस्स्त्रा । रिया आ यिवा र । विश्वश्वा मा १ यिद्धी रा तमा

१०५

३।शो२३४५।तौ२३४५॥ ॥विश्वस्वा३मो३।यिह्वीतमाँ।शातौ।वौ।वोयिश्वस्वमिह्वीत
मो।शो१तारा।ऽऔयिन्द्रऽ६ःस्तामो३१२२४यि।निर्मर्हयाँ।तेऽऔयो१।वा२ः।प्रियामा१
यिधारो।साँऽऔ३।स्वो२३४५।रौ२३४५न॥ ॥१६॥ ॥इन्द्रो विश्वामित्रो वापरत्वष्ट्र
कसामः॥ ॥इर्वं६ःरोहितकूलीयम्॥ ॥इन्द्रमच्छो।सु।ता३।मा।हेषणाऽय्यन्तुह
रयः।श्रो।ष्ट्रो।डा२३तो।सो२३ई।दोवसू।वा३१उवा२३।वी२३४दोः।ऽऐयेम्नरो।य
सोनसिः।इन्द्राँयपवतेसुतास्सोमा।डा२३यित्रो।स्या२३वे।तोसियेथा३१
उवा२३।वी२३४दो॥ ॥ऐस्यदिन्द्रोःमादष्ट्रा।यो नक्षुःब्रताँतिसोनसिवेऽ।ऽश्वो

२३वा।षोर२३णांम्।नोर२स्समा३१जवार२३।प्रू२३४ङीत्॥ ॥१०॥ ॥श्यावाश्वः

पिपीलिकमध्यास्वनुष्टुप्सामः॥ ॥श्यावाश्वम्॥ ॥परा३१यि।कौ२कृ।प्रधां।वो

३वां।एहियां।कौ।सांतयंपा।रि।ट्टत्रा२।ऐहियार।णिसक्तौ।णयिद्वी३।यिषा

३ः।तार२३४रा।ऐहार२यि।ऐहियार।धियांरुणयानो२३ई।शि।रा२३४पासा६हायि॥ ॥

अ।जा३१यि।जा२३ना।हिपं।वा२३मां।एहियां।नो।स्तु।रियद्वायि।धां।र२श्या२।ऐहिय

रा।कमनो।पेय्यागो२३डी३।रार२३४यां।ऐहार२यि।ऐहियारार२७हमां।णाः।स्तू२३रा२

म्रा।धा२३४पायाऽहायि॥ ॥अ३नूः३१।हा२यित्वा।स्तुतम्रा।सा२३मां।एहियां।मो।दामसि

106

ए ङ्गरयि।

मा। ह्वे। सिमा ३ रा ३ ए हियार। यरा। डि ग्नियवौ ३ र। औ। ६३। आ २३४ नी। ए हियार। पव

मा ना। प्रो ३ गा ३। हो २३४ ५ सा ६ हा यि॥ ॥१८॥ ॥ आन्धीगुः पिपीलिकमध्वास्य

नुष्टुप्साम:॥ ॥ आन्धीगवम्॥ पर्यूषुप्र धा। न्वा वौ। डौ सा तु। ए पा २३ री।

कु म्मा २१२। ह्वे त्रौ। णि सि क्रो। णि ट्वि षि स्त्ता २३४ पे। धौ या २ ऋ वौ। णो २ यो:। ना २३ ई।

र सौ। अ ३ हा वा॥ ॥ औ डी ड ना। हि पा। वा मो। ने स्फु रि। य ब्वा २३ यि धौ। कु म्मा र

१ रा। रं शे। क्म ना प यो। गो। डी रे यो २३४ पा। रा ८। हो ३ ऋ वो। मा २ णा:। घृ २३ रो म्।

धि यौ। अ ३ हा वा॥ ॥ अनु हि त्वा सु ता १८ सामो। मे दो म। सिमा २३ ह्वे। कु म्मा

२१२। सामर्य्यौहाँञ्जियवा ऊँ। ७ ज्जैनीर२३४५। पौवोऽऊवा। मारनो। प्रा२३गो। हसो। अ
श्हौवा। हौपइ। डा॥ ॥१९॥ ॥सुहविरऋारपङ्क्तिःस्सामः॥ ॥वाङ्निःधन७सो
हविषम्॥ ॥पौर्यपारी। त्रैधन्वा॥ हावोऽश्होयि। इन्द्रौयसोमा। हावोऽश्होयि।
स्वादुम्मित्रौया। होवोऽहो२३यि। पूषाष्णोवो३२३४वा। नगापयाऊ॥ ॥एवा। एऋा
यिवा। एवा। एऋायिवा। ऋमेतौया। हावोऽश्होयि। मार्हऋौयौया। हावोऽश्हो
यि। सख्युक्कोऋषी। हावोऽहो२३यि। दिष्णोवो३२३४वा। पीयूपषाऊ॥ ॥इन्द्रैः। १०७
एऋायिन्द्रौः। इन्द्रः। एऋायिन्द्रौः। तौसोमा। हावोऽश्होयि। सुतेस्यापिया त

हा वौ ३ हो यि । कत्विद क्षा या । हा वौ ३ हो २३ यि । विश्वेवा वौ ३ २३४ वौ । चैदायि

वा जि वा ॥ ॥२०॥ ॥ वाजजित्के वाजगतीसाम ॥ ॥ वाजजित् ॥ ॥ सूर्यस्येवा ।

रश्मयो द्रा वयित्नवः । हा वौ ३ हो यि । मत्सरासः । प्रसुतस्सा । कामीरता यि । हा

वौ ३ हो यि । तन्तुन्तता । परिसग्गा । सौ अशवाः । हा वौ ३ हो यि । निन्द्रा हेता

यि । पवे तिधा । मौ किञ्चना । हो वौ ३ हो रो । वौ २३४ औ हो वा ॥ ॥ उपोमेतायिः । हे

चोतिसायि । च्यो तिमधू । हा वौ ३ हो यि । मेन्द्रो डेनायि । चादतिज्ञा । तारोसना

यि । हा वौ ३ हो यि । पवमानाः । सन्तेनिस्स । वौतो मिवा । हा वौ ३ हो यि । मे धुमान्द्रा ॥

स्रः पैरि वा । रामे र्षताऽयि । हाउवा३ । होरे । वा२३४ औहोवा ॥ ॥ तं क्रौ मि मायि ति

प्वैतिया । तीधि न वाः । हाउवा३ । होयि । देवस्यै दायि । वीरूपया । तीनिष्कृ तामर्हा

वा३ । होयि । त्य क्रै मायित्रा । त्रे र्त्मुनि वा । रामे घ्रु याम् । हाउवा३ । होयि । त्वं क्रैन्ने

नायि । त्वं मम्पैरि सा । मो । त्रे घ्रुता । हाउवा३ । होरे । वा२३४ औहोवा । वाजी जिगीवा

दशमोग्निष्टोमसाम

ण्वाधेनारैनीरे३ । पे ॥ ॥२१॥ ॥वामदेवो विराडग्निः ॥ ॥विराड्वामदेव्यम् ॥ ॥

ओऽपग्निम्मानौराऽ२दौ३यिधीतिनायिः । औरा । क्ष्या । हैस्तच्युतं जनयत प्रशस्त

विकल्प

न्दूरा । हु । अ३हो है । औरा क्ष्या हस्तच्युतं जनयत प्रशस्तन्दूरा । हु । अ३हो है

108

१०८

इतिवा प्र।

यिप्रो ड्वाः२३ र्हपा। तिमो। हो३। कुम्मा२। थाँ२। ग्वो३ऽ४ पहोयि॥ ॥ तो ऽ४ पमाग्निमाँ३
स्ता३ यिवँसवाः। नोयि। अप सर्वे ऋसु प्रतिचक्रो। मवासँकु तेश्रिद्दे क्रौ। यि। या। अ
३ र्हा हो यि। नोयि। अप सर्वे ऋसु प्रतिचक्रो। मवसँ क्रतश्रिद्द क्रौ। यि। या। अ३र्हा
होयि। यादा२३म ओ। सेनो। हो३। कुम्मा२। त्याँ२। यो३ऽ४ पहोयि॥ ॥ प्रेऽ४ पद्धः। ओ
३ः म्यो३ यिदीदिहोयि। पू। रा। नी। ऐ डस्स्वयाँ स्रुम्यायविष्णुत्वाँ। मृ। श्रा। अ३र्हा
होयि। पू। रा। नी। अ डस्स्वयाँ स्रुम्यायविष्णुत्वाँ। मृ। श्रा। अ३र्हा होयि। स्वे न्ता२३उ
पा। यं न्व्यो। हो३। कुम्मा२। वाँ२। ज्रो३ऽ४ पहोयि॥ ॥२२॥ ॥ इति दशरात्रपर्वसमा

इतित्रयोदशाहः॥ ॥इदानींसंवत्सरसत्रात्मकोगवामयनस्याह्नोऽभिधीयते॥ ॥प्रायणीयसंज्ञकेचतुर्विंशेऽहनिमाध्यंदिने॥

स्तमम्॥ ॥अर्द्धःप्रपाठकः॥ ॥इदानीꣳसंवत्सरपर्वप्रवर्त्तते॥ संवत्सरसत्रे॥
॥ ॥अमहीयुर्गायत्रीसामः॥ ॥आमहीयवम्॥ ॥हर्षापा२वस्वधा२रयामरू
त्वोतार२यि।चेमा२२३स्सरः॥विश्वादधानउ२२३डासोजवा३॥ ॥तन्त्वाधा२तोर
मणियाः॥पवोमो१नार।सुवा२२३इंशंम्।हिन्वेवोडोयि।षुवा२२३डिनोजा।वा३
॥ ॥अयाचा२यित्ता।विपानया।हरायिःपो१वार।स्वधा२२३रयो।युडेवोडोयिषु
त्वा२२३दयोजा।वा३।स्तोषे३४५॥ ॥१॥ ॥वसिष्ठस्यहतीसामः॥ ॥समन्तमम्॥ ॥ १०९
पुनानास्सामधा२रयो॥ ॥आपोवसानोअर्षसायि।आर२त्ना२२३धाः॥योनिमृतास्य

सोयिदा सो। ओ हो ३४ वा हो यि। तत्। सा दा २३ यि वा ३ः। हो वा ३ हा यि। हि रे ण्या २३

यो ३४३ः॥ ॥ ३ त्सो दे वा हि रे ण्य यो ः। त त्सो दे वा हि रे ण्यया ः। दु हा ना २३ ऊ। धे

र्दि वि य म्। म धु प्स्रा यो म्। ओ हो ३४ वा हो यि। प्रे। ना ऽ सा २३ धे ३। हो वा ३ हो। स्थ मा

सा २३ दो ३४३ त्॥ ॥ प्रे त्ने ऽ सं धस्थमा स दो त। प्र त्ने ऽ स धं स्थ मा स दा त। आ प्ट च्छा र

३ यो म्। धरु णं वा। जि यो षा सो। ओ हो ३४ वा हो यि। न्दे। ना यि। धि २३ तो ३ः। हो वा

३ हो यि। विचे क्षा २३ णो ३४३ः। ३ २३४५ इ। डा॥ ॥२॥ ॥ वसिष्ठस्य बृहती साम॥॥ त्व

वः॥ ॥ हो। वा ३ हो। वा ३ हो ३ हो। ३ २३४ वा हो यि। ऊ। त्सो दा २३ यि वा। हा यि र ण्या २३४ या ः।

ॐ। हासो दा२३४ यिवा। हो यिरख्या२३४याः। दृहो नो२३४ऊ। धे दियि वो२३४यी

म्रा। मो धुप्ला२३४ या म्रा। प्रत्नं सा२३४ धा। स्थो मो सा२३४ दा। हो॥ वा३हो॥ वा३दो

३। हो। उ२३४ वा। हा३४। औहोवा। ए३। ऋतं विश्वानि दुरितानि तारमा२३४५पः॥ ॥

॥ २॥ ॥ दीर्घश्रवाराजन्यर्षिर्बृहतीसामः॥ ॥ दैर्घश्रवसम्॥ ॥ प्रत्नं सध

स्थमासदत्। हो हो। उ हा३ए। प्रत्नं सधस्थमासदत्। उ३हो। उ३हो३ए३४। औपा

३४ छियाम्रा। धेरु एणाम्रा। वाङायर्षसायि। उ३हो। उ३हो३ए३४। न्दमा३४यि याधि

ता३ः। विचो२३४ वा। हा पाणा६ हायि॥ ॥४॥ ॥ पृथिवीत्रिष्टुप्सामः॥ ॥ पार्श्वम्॥ ॥

ऽ३ हो३ हो यि प्रकाविया म्रात्छ्रानि । वक्वा णः । दा वा देवा । नो३ ऊ नि मा वि

वक्री । म हि ब्रे ताः । श्रु चि बा धुः प वा काः । प दा वे रा । हो३ ऊ नि । ओ३४३ यि । ती३ रा

प यि ना ६ प ६ न्र ॥ ॥ प्रे ह ९ सो सा सा ः । त्प ला । व स्नु म ला । अ मा द स्ता म्रा ह्व ष ग । णा स्थ

याँ स्तूः । ओ ड्रूः षि णा म्रा । प वे मा । न ९ से खा याः । द्रु म्म र्षे ह्वा । णो३ मे प्र वा दो३४३ ती३

सा प का ६ प ६ म्र ॥ ॥ सो यो डे ता यि । ठे रु गा । य स्वं ज्ञू ती म्रा ह्व श्री क्री डा । तो३ म्मि

मा त न गा वाः । प री णो सा म्रा न्ते णुं ता । ति ग्म श्टङ्गः ॥ ऽ३ हो३ हो यि । दि वो ह रा यिः

तत्रैवब्रह्मसाम ॥

। दे दे श्री । नो३४३ । क्रो३ मा प ञ्च्र ६ प ६ः ॥ ॥ प ॥ ॥ इन्द्रो ब्रहतीन्द्रः ॥ अनीवर्त्तः ॥ ॥

॥ मा᳘चा३ यि दौ३ न्न्युद्धि ष्णो ८ स तो वा। सो खा या या मा ॥ रि षो ह्या १ ता रा। आ यिन्द्र मि

त्सो ३ १ २ ३ ४। ता ह्व षं णो म्। से चो स्१ ता र यि। मु हू रू१ क्को। च शो ३। सो २ ३ ४ ५। तो र ३

४ ५॥ ॥ मु हू २ रू २ क्को। च शो ८ स तो वा। मू हु रु क्को। च शो ८ सो १ ता रा। आ व क्र तो

३ १ २ ३ ४ यि। णां ह्व ष नं म्। ये थो डू १ वा र म्। गो न्नो १ चा रि। षे णो ३ यि। सो २ ३ ४ ५। हो र ३

४ ५ म्॥ ॥ गो न्नो ३ चौ ३ षे णी स हो वो। गो न्न चै। ष णो। यि सो १ हा र म्। वो यि ह्व ष णा ३

१ २ ३ ४ म्। से व्व नं नं मु। नै यो डूः१ रा र म्। म ८ हो यि ष्ठो १ म् रि। नै यो ३। वो २ ३ ४ ५ यि।

नो र ३ ४ ५ म्॥ ॥ ६॥ ॥ अ ग्नि र्गा य त्री सा म॥ ॥ उ रा बा धी य म्॥ ॥ यो स्त मा दो

वो। वो। रे। णि। यो:। तिनो। पा२३ वो। स्वञ्जन्धोसा। दिवा। वा१यिरा२३ घो। शो। सो। हो३४
५इ। डा॥ ॥ ङ्के। ङ्ग्नि वृ त्रो। वो। ओमित्रियो मा। से। स्नो। यि वा२३ ज़ो मा। दिर्विदो। यिवायि।
गो। षा। तो१यिरा२३ ष्श्वा। सो:। औ सो३४५इ। डा॥ ॥ सेम्मिश्लुउ वो। रूषो। नु वो:। स्रूपो
स्ला२३ नी:। नाधिनूँ ना यि:। सीदा। ञ्ञ्यौ१ यिना२३ नो। यो॥ नि मो३४५इ। डा॥ ॥७॥
सुज्ञानतुष्टि क्कसामः॥ ॥सुज्ञानम्॥ ॥इन्द्रम च्छा। सुतो इमायि। हे षणो। आ। र।
उहरे या:। श्रे। ष्टो। ज़ो। ता। र। सइ। दा। रे वा२३४ औ हो वा। सुव र्विदए३॥ ॥ श्रेयमि
रा। यसो। ने। सा यि:। इन्द्रो। यो। पा। र। वा। तिसुता:। सो। मो। ज़ोयि चा। र। स्य। चि। ता। रे तो। र

३४औ हो वा । ये ष्या विद ए३ ॥ ॥ अस्ये दिन्द्रः । मादे ष्ववा । या नङ्को न्कृ । रा तिसा

नेसा । यिम्रा । वेङ्ग्ज्ञे वा र । षणोम्रा । ना रि रो २ ३४ औ हो वा । से म प्सु । जि दर३ उ पा र

३४५ पो ॥ ॥ ५ ॥ ॥ कुत्सौ नु ष्टुप्साम ॥ ॥ तृतीय काण्डम् ॥ ॥ पु रो डि ता हो

यि । वो ञ न्ध सा ३ ए । सु ता र ये मा रि दे या २ ३४५ यि । नो २ ३४ वा । अप श्श्वा न ष्टश्न

थि ष्टु ना र ३४ पो । से खा या या २ ३ दी । घ डि द्वा २ ३ या २ ३४ ३ म् ॥ ॥ सै खा या या दा हो घ

डि द्वि यां ३ मां । यो धा रे ये या रे । पा वा २ ३४ । को २ ३४ या । परि प्रस्यन्दा तसु तो ः

इन्दु रा २ ३ स्त्वो ः । न के त्वा २ ३ यो ३४ ३ ः ॥ ॥ इन्दु रस्त्वाः । हो । नके त्वियां ३ ए । तो न्द्र र

रोषारिम्।ओ३।नो२३४५यि।नो२३४रोः॥सोमविश्वाचियाधियाः।यज्ञो।या२३सो

।उवेङ्गा२३यो२३४३ः।ऊ२३४५ई।डा॥ ॥६१॥ ॥ऊर्ध्वसाड्गतीसोमः॥ ॥स्वारका

वम्॥ ॥प्रो।वा।अयासीदिन्दुरिन्द्रास्यनिष्कृतम्।सखासख्युर्नप्रमिना।

तिसङ्गिरः।यिरा२म्।मर्य्यइव युवतिभिः।यिः।समर्षता२३यि।सो।मो२३ः।कलशा।शा

शतायार३।मो।नो२३पा।पथा६५६॥ ॥ओ।वा।धियो।मन्द्रयुवा।विपन्युर्वारः।

पनस्युःवस्सदनेनवारणायि।षुव क्रोमम्रः।हेरिर्ङ्गी।डन्तमज्मन्।षेतस्तेन्।नार३ः।

ओ।नी३।धेनाः।वेःपयोसार३यित।ओ।शा२३यि।श्रायपयू६५६॥ ॥ओ।नो।वा।सोम

113

संय्युतम्म्पायि। ऊषीमो यिषारम्‌। इन्द्रा पवस्वपव मा। नेऊर्मोयि णारा यो नो

दोह तैत्रिरहान्‌। औस श्रूषार२३यि। ऊमोर२ ह्वौं। डा। वेन्म धूमार२३। सू वोऽ३यि

सांपयाः ६पदम्‌॥ ॥१०॥ ॥इन्द्रो विराड्वा यत्री सोमः॥ ॥सत्राहीयम्‌॥ ॥ औऽग्ना

३४यिम्‌। वीतृधन्नम्‌। उहुवा। औहुरां णां म्पुरुतार मोम्‌। औ र छा। नार२३ ष्ट्रा।

सोहोऽ३हो। वाहो२३४३यि। स्वोर२३४ ताः ६ हायि॥ ॥ औ यो२३४म्‌। यर्थोन औ नुव

त्‌। उहुवा। वे ष्टौ स्तूर्पवत ज्ञोरयो। औरस्या। ज्ञार२३ वो। योशोऽ३हो। वाहार

४३यि। स्वोर२३४ ताः ६ हायि॥ ॥ औ यो२३४म्‌। विश्वा औ नित्रिया यः। उहुवा। औग्नि

११२

ई विष्णुपत्न्यार तोयि। आरवो। जार३यि रू पानो३हा। वा हा३४३यि। गोर३४

(अभिप्लवकानांप्रथमेमध्यंदिनः)

मो६हा यि॥ ॥११॥ ॥ अश्वागायत्रीसामः॥ ॥ आश्वम्॥ ॥ प्रेसोमासार विप

श्चिताः। अपान यन्त्तऊर्मीरयोः। वेनानिमार३हा। षार३ऊवा३। वार३४५॥ ॥

हेमि। द्रोणार निबर्द्धे वाः। स्रुक्षोरुतस्यधारारयो। वाजे द्रुमार३न्नाम्।

औ द्रोर३ऊवा३। रार३४५न्॥ ॥सुतोइन्द्रारय वायवायि। वरुणायमरुद्भ्या

रयोः। सोमा अर्षार३न्त्। वायिष्णार३ऊवा३। वार३४५यि॥ ॥१२॥ ॥वसिष्ठा

बृहतीसामः॥ ॥पञ्चम्॥ ॥प्रासो४मो। दे४यिववी। तयो३यि। सायिन्द्रूः। न

पायिा। प्रे। औणसा३। औ ७ र्शा। पया३। सामारदा२३४यिरा:। नजा। इवोवोवो३

२३४वा। अर्छा। काहि। वो३२३४वा। मधूप्स्सुताम्रा॥ ॥ अर्छा४का। शा४म्मधू।

प्स्सुता२म्रा। और्छा। काशाम्रामधूप्स्सुता३म्रा। औहर्या। ता३। औजी२ नो२३४औ

। कै अ। औता वा उ२३४वा। प्रियः। सूनोवोउ२३४वा। नमापर्डियाः। प्रिया४ःस्

। नू४नेमा। जियो३ः। प्रायोः। सूनूः। नमोजायो३ः। तोमी७हिण्वो३। तिया२पो

२३४साः। यऔरेत्वोवोउ२३४वा। नदी। ड्रिवोवोउ२३४वा। गंनापस्त्रियाःदो ११४

ब्रह्मसाम

पहाडा॥ ॥१३॥ ॥इन्द्रो ह हतीन्द्रः॥ ॥अनीवर्त्तो॥ ॥ताबा३दा२स्माम्रतीष

हाउवा । वो । सोमैन्द्रौ । नमो । न्धा१ । सोरः । औ । निवत्सौ३१२३४म् । नेत्स्वसौराः । वृधे
सिनो१वोरः । इन्द्राइ । ङ्गो१यिर्नीरि । जैवोर । मोर२३४५ । हो२३४पयि ॥ ॥ इन्द्राइ ३ ङ्गो
३यिर्सिन्नि वोमाहा वा । औयिन्द्रङ्गोरिः । नवोमो१ हार यि । घृष्ट्वा८ सुदो३१२३४
नुन्तविषी । निरोवो१तो रिम्रा । गिरो यिन्नो१ स्तरो रुतो नो३ । जो२३४५ । सोर२३४५पम् ॥ ॥
गिरा३ यिन्नो२ स्तुरु सा जा सा वा । गो यिरिन्ने पा रु नो जो१ सार म्रा । स्कूम न्तवो
३१२३४ । जो८ स्था । तिनम्रा । सेहोसो१ यि सार म्रा । मस्कृगो१ । मरितम् । मो३ यि । मोर२३४
माध्यंदिनि
पा । हो२३४पयि ॥ ॥१४॥ ॥ इन्द्र उष्णिक् सोमः ॥ ॥ रुङ्गानम् ॥ ॥ पैवार्तहायि

र्तो हेरा यिः। इति क्रोरारा। सिर ७ हिया। इतियो षीरा। स्तोटे। न्यारेवोर २३४ औहो

वा। रेव ह्वे श्रा ए३ ते पार २३४५॥ ॥१५॥ ॥ काशीतउष्णिक् सोमः॥ ॥ काशीतम्॥ ॥

पैव तिहा यें तो हार २३ शों ३४ यिः। इति द्वरा। सिरे ७ हार २३ यो ३४। इतियषा। स्तो
(स्त्र २३४५ वोः।)

टाक्षो वीरवेता। या रे। शो र २३४। औहोवा। के २३४ पौ॥ ॥१६॥ ॥ गौरीवितिर्गाय

त्रीसामः॥ ॥ महागौरीवितम्॥ ॥ प्रसु। न्वा नो ३। यै इ अन्धसाः। मे र्त्तोनवष्टतद्वचा

र ३ः। ओप श्वा नो ३१२३ म्रा। इ रा ५ धसाम्। हो र्तो मरवो ३१२३ म्रा। नेत्ता वो। गा पावाद

हायि॥ औ डो। मि रो ३। के इ श्यो ता। न्तु डो नपुत्र उ णियार २३ः। सोर ज्यो रा ३१२३ः।

११५

नायापषणाम्। वोरान यो३१२३। निमावासापादाङ्हायि॥ ॥सर्वीरोदो३हू

साधनाः। वियस्तस्तम्म्रारादसार३यि। हेरिःप वो३१२३यि। त्रे आपद्युता। वोयिधा

नायो३१२३। निमावासापदोङ्हायि॥ ॥१७॥ ॥प्रहितङ्क्षिकेसामः॥ ॥अक्षि

हमाकोनिधनम्॥ ॥ओडो३मिर ह्वे आद्युता। नुडोयि। नपुत्रे ओरणायारः।

सेरडोरानयार षाणारम्। वारानार३४यो। निमा। सारेदार३४ ओहावा। ओर

३४काः॥ ॥१८॥ ॥उदलोऽनुष्टुप्सामः॥ ॥अदलम्॥ ॥सर्वीरादो। ह्रासारध

नाः। वियस्तस्ता३। नारादार३४सायि। हेरिःपवोयि। त्रे आरद्युता। वधोनार३यो

३। नो २३ यि माँ ३। सो ३४५ हो ६ हाँ यि॥ ॥१९॥ ॥इन्द्रो नु ष्टुप् सोमः॥ ॥साङ्कृम्॥ ॥

प्र सु न्वा ३ ना य औ न्धसाः। म र्त्तो नि वो रि ष्ट तो ३४५ त। वो २३४ चाः। औ प श्वा न म

रा धे सा २३ ४५ स। हो ता ३ २३४ वा। मो खा ३ २३४ वा। न चूपगवाः। औ औ मो ३ यि र

त्वि औ यू तो। नु डो यि न पू रे त। त्वै ३४५। णी २३४। यो:। सेर डो। रो ना यो ष णो र

३४५ स। वो रा ३ २३४ वा। नो यो ३ २३४ वा। निमापसदाम्॥ ॥सदी रो २ दं हो साध

नाः। वि या स्त रे तो रि। जे रा ३४५। दो २३४ सी। हे रिः। प वि त्रि औ ह्य तो २३४५। वो यि धा ११६

३ २३४ वा। नो यो ३ २३४ वा। निमापसदाम्। हो ५ इ। डा॥ ॥२०॥ ॥इति कहगानेषु

ऋचि त्रवस्य द्वितीयदनिमध्ये दिने॥

ष्ठः प्रपाठकः॥ ॥ द्वविष्णोन्गायत्रीसामः॥ ॥ द्वाविष्णोतम्॥ ॥ हौऊ वृषाप

वस्व धारया हाऊ । मरुत्वतो३यि । चा मत्सो२३४राः । ए राहा१ आ२३यिही । वि

ष्णो दा२धो । नन्दो । आरेसा२३४औहोवा ॥ ॥ हौऊ त त्वाधर्तारं सा । व्या हाऊ ।

पवमा नो३ । स्ववर्ह्२३४ शाम् । ए राहा१ आ२३यिही । हिन्ववो२ ऊ यि । श्रुवो ऊ

रेयिना२३४औहोवा । हावया चित्तो विप्रानया हाऊ । हरिः पवो३ । स्वोधरा२

४या । ए राहा१ आ२३यिही । युजा वा२ ऊ यि । श्रुवो दारेया२३४ औहोवा । ते

द्वितीयाद्यमिश्रवद्वितीयदनिदाविष्णतस्थाने योक्तामिभवद॥

विष्णोत२३४५॥ ॥१॥ ॥ युक्त्वोष्वो गायत्रीसामः॥ ॥ योक्तोत्तरम्॥ ॥ वृषा

औहोहाहायिपवस्वाधारायाः। मोस्रेत्वार२३४तायि। चमा३। उयि। चमारेत्सोर२३४रा॥ विश्वा औहोहाहोयिदेधारेनोर२३४उ। ऊरेसार२३४ औहोवा॥ ॥ तन्त्वा औहोहाहायि। धर्तारिरोमा१णायोः। पोवारेमार२३४ना। सुवो३। उयि। सुवारेर्द्दर२३४शोम्ना। हिन्वा औहोहाहोयि। वाजारेयिषु२३४वा। जोरेयिनोर२३४औहोवा॥ ॥ अया औहोहाहोयि। चित्तो३वोयिपो१नायो३। होरारेयिःपोर२३४वा। स्वधा३। उ। स्वधारेरोर२३४या। युजा औहोहाहोयि। वाजारेयिषु२३४चो। दोरेयार२३४ औहोवा। उयि। ऊर२३४वा॥ ॥२॥ ॥मधुश्चुन्दा बृहतीसामः॥ ॥माधु

स्थ न्द्र सम्॥ ॥ परी। ताषा। हायि। चतासुता३मा। सो। मायेऽ३। तामे ६ हा२३४वीः।
देधन्वा ६ यो नार्षीऽ३ज्ञा। सुवेन्द्रारो। औहो३४वा हायि। सुषावासो। औहो३४वा
हो। ममे ह्वा२३यिनो३४यिः। उ२३४५इ। डा॥ ॥३॥ ॥ ज्ञायास्या ब्रृहतीसोमः॥ ॥
॥ एडमायास्यम्॥ ॥ ओयिपरोयि। ताषायि। चतासुताम्। सा। मायक२१। तमे ६
हवायिः। दाधन्वा ६ या२१ः। नर्षीऽ३ज्ञा। सुवेन्द्रारा। सुषावसो२१। ममे ह्वा२३यिनो२
४३यिः॥ ॥ ओयिसुषो। वासा। मेमे द्विनायिः। सुषावासो२१। मेमे द्विनायिः। नूनम्पु
नो२१। नो ज्ञविनायिः। परिस्रवा। ज्ञादब्रुस्र२१। रेभिन्द्रा२३रो३४३ः॥ ॥ ओ ज्ञ

118

दो। ध्वा स्स्प्रा। रे नि न्त रा ः। आ द ब्रु स्सं ३१। रे नि न्त रा ः। स्प्र। तं चि त्वौ ३१। सु म दा। मो

औ न्ध सा। श्रा यि णा। न्त्रा। गौ ३१। नि रु त्ता २३ रो ३४३ म्। उ २३४५ इ। डा॥ ॥४॥ ॥ श्र

या स्या। बृ ह ती सा म ः॥ ॥ त्रि णि ध न मा या स्य म्॥ ॥ श्री णा। न्त्रा। गौ। नि रू। हो। ज। हा

वा। ता। रे ८ श्रा २३४ यि णा। ता। गा रे। नि रू ३४५। ता २३४ रा म्। प रा ३४। आ। हा। वा। स्वा

नै श्व ह्वा। सं द रे यि। वै मो ३४५। दो २३४ नो ः। क्रे रू २३४। आ। हा। वा। औ यि न्दू रे ः। वि

चो ३४५। ह्वो २३४ णो ः॥ ॥५॥ ॥ पृ श्नि वी त्रि ष्टु प् सा म ः॥ ॥ पा र्थ म्॥ ॥ उ ३ हो ३ हा यि

। पृ षा। श्वा। णा। औ त्नि क। नि क्रो द ङ्गा ः। नं द यें न्ना यि। षी ३ पृ श्नि। वी मु त द्या म्। इ न्द्र

११८

स्यवा। वे ऽऽम्नुरो। ऽऽष्टवे ऽऽ२३ जा जा। प्रवाँ दे या न्नू। ऽऽ२३ र्षासि। वा३४३। चो३ मा। ५ यिमा

इ५इम्॥ ॥ रे सा यि या: पयसा। पिन्वमाना:। ईरये न्ना यि। षी३मे धु मन्तम ७ श्रु म्र।

पवमाना। सन्न्ते निम्र। एषि न्द्रु ण्वा न्रा इन्द्राय सा। मो३पेरि। षो३४३। ओ। यो३ मा। ५ यि

ना इ५इः॥ ॥ए वा प वा। स्वा३ मदि। रा मदाय। उद स्थो भा। स्या३ ने मा यन्न्वृ धस्नूम्र।

परिवे ष्मा म्र। न३ मा॥ ण्रा रु शन्न्ता मू। उ३हा३हा यि। गभ्रू। र्नि ऽऽ। षा३ पेरि। सो

द्वितीयं इति ब्रह्मसाम॥

३४३। मा ष्टसा। ५ यि क्ता। इ५इः॥ ॥९६॥ ॥इन्द्रो ब्रह्म तीन्द्र:॥ ॥अग्नीवर्त:॥ ॥ऽऽ२३

ना३ यि प्वो३ वस्सु रा धासा वा। ओ यि न्द्र मे च्वी। य थो वा। यि दा२ यि। यो ऊ रि द्वृ३

119

१२३४। च्यौमघवा। पुरूवा।स्व३रः।स होस्वा१णारे३यि। वेशा३यि। होर२३४५।तोर२३

४५यि॥ ॥सहा३स्व३राणां वशिह्वा। तावा। सोहास्वा१णां। वशा। यिह्वा१तार२यिशा

तोनीकोर३१२३४यि। वेप्रडिंगा। निधंस्र्वे१या२। हन्ता यिवा। चरि।णिदो३। स्प२३

४५।षोर२३४५यि॥ ॥हन्ता३यिवा३चाणि। दोस्थाषावा। होत्वितैच्चा। णिदोस्ट१षार

यिगोयिरं रिवो३१२३४। पिरसा जा। स्थपा यिन्वो१यिरार२यि। दत्ता णा१यिस्वरेरु

ज्यो३। जोर२३४५।सोर२३४५पे:॥ ॥७॥ ॥शाङ्कुः कक्रुप्साम:॥ ॥शाङ्कु:॥ ॥पवेस्वमोए

र। धुमातमा:। इन्द्रायसोम क्रा३ वितै मो मार२३दो:। मोहीरद्यु क्रार३। तेमोर२३

११९

४वा। मा। प दो ६ हा यि॥ ॥ मे हि द्धे कं॥ ए रा। तेमाः। म दा। यस्य। तपी त्वा। हृष। त्वा। तृषा

या २ ३ तो। यि। ओ स्या २ पो यि त्वा २ ३। सु वा २ ३४ वा। वा। प यि। दा ६ हा यि। अस्या पी

त्वा। ए रा। सु वाः। विदाः। स सु प्रा कि तो। अ नि य क्का मी दा २ ३ धिषाः। आ छा २ वो जा २ ३

मू नै उ २ ३४ वा। ता। प प्रा ६ हा यि॥ ॥८॥ ॥ गौरी वितिरनुष्टुप्सोमः॥ ॥ महागौरी

[अथ मसुतक्ये]

वितम्॥ ॥ अय म् प्र पू षा ३। र यि र्बृ गाः। सो मः पु नी नो। अ र्ष ता २ ३ यि। पो ति वि

श्वा। ३ २ ३। स्य नृ प म नाः। वो य क्र श्वा द्वा ३। २ ३। दा सा वा। ऊ पा प्रा ६ हा यि॥ ॥ समु

प्रिया ३ः। अ नू ष ता। गो वा म दा य हू ष्वा या २ ३ः। सो मा सः का ३। २ ३। ए वा ता प यि प थाः।

पोवर्मा जो३ १२३ १सँउवाँ। दाँ ५। वाइहाँ यि॥ ॥ यर्उ३। डि ष्ठाँ २ः। तँमाँ नरा। पेवर्मा न

श्रवाँयि यार३म्। योःपञ्चचाँ २१२३। षँणा पयिर नायि। रो। यिर्घ्नो २१२३। वँनावाँ।

माँपाहा इहाँयि॥ ॥ ए॥ ॥ प्रथमतृतीयौ। अमहीयुःक कुबिन्द्रः॥ ॥ कु कृयामहीयवम्॥ ॥

अन्त्रीर्हे २। घ्वी। अनो उवामू। अनो पा१यिरा २यि। द्रे ऊनुषा सना२उ दसोयि।

यूधँ दाँपो यि। वमा२३यि छसाँ ज। वा३॥ ॥ युधँ दाँ३पित्वमिछसा यि। नेकोयि

रो१यि वारा। ते ६स खियाँ। यवा२३यिन्दसाँ यि। पो यियेभ्निता यि। सुरा२३ स्तुवो

ज। वा३॥ ॥ पीयन्तो३यि। तसुरा स्तुवाः। येदाँका१ णोरि। षिनदनु६स मूर२३ हसाँयि।

120

तृतीयमुक्थं

ओदि त्सितोयिवह्नू२३यसो ऊ। वा३। स्तोषि२३४५॥ ॥१०॥ ॥आष्टादंष्ट्रोऽनु

ष्टुबिन्द्रः॥ ॥उत्तरमाष्टादंष्ट्रः॥ ॥इन्द्रंविश्वाअवीवृधान्त्सा दो। हा३वा। समु

द्रव्यचसं समा गो यिरा२३६। ए यार२३त। औ२३ हो वा। रथीयितमं रथीयिना२३म्।

ए यार२३त। औ२३ हो वा। वा जा नां सत्पतिम्। पोती२३म्। ए यार२३त। औ२३ हो

वा३४३॥ ॥सख्ये त इन्द्र वाजिनाए या दो। हा३ वा। मात्तेमे शवसः पाता२३यि।

ए यार२३त। औ२३ हो वा। वोमनिन्नानो। नूमा२३ः। ए यार२३त। औ२३ हो वा। जे

तारमपरा। जा। यितार२३म्। ए यार२३त। औ२३ हो वा३४३॥ ॥सूर्वेरिन्द्रस्य रातये

121

ए्या। दौ। हो३वा। नविदस्यन्त्तियू। तोयार३ः। ऐयार३त। अर२३। हावा। यदौवोङ

स्थ्य गो। मो तार३ः। ऐयार३त। अर२३। हावा। स्तो टोब्भ्या मध्दे। तोमो घार३म्। ए

यार३त। अर२३। हावा३४३। ऊ२३४५इ। डा॥ ॥११॥ ॥विरूपो गायत्त्री सोमः॥ ॥

इति पदनिमाध्यंदिने॥

गायत्त्री वैरूपम्॥ ॥उच्चा। तर२३४ जा। तेमो न्धस३सो३ः। दिवारियिसोर२३४ ङ्ग।

मो। यो१दादार२यि। उग्यार३म्। पृष्मो२३४ अ। हावा। मेहि श्रवो२३४५ः। सेनोत्त्रा

२३४ यिन्द्रौ। येयो जेपा२वा२यि। वेरू२णा२३४यो। मोरुद्भ्यार२ः। वेरा२३यि।

१२१

वावो२३४ औ। हावा। परिस्रवो२३४५॥ ॥एनो वार२३४यि श्वा। निज्जो यो२ जो३। हेम्मा

रेनौ र३४ यिमाँ। नूषाँ १ णा रम्। सिषा र३। सन्तो ३४ आ हाँ वा। वे नो मे हो र३४५ यि॥ ॥

॥।॥१२॥ ॥रुरु बृहतीसोमः॥ ॥रौरवम्॥ ॥ओ त्तिर्सो मौसार ओ या र३४ वौः। पौव

न्ते मद्घां प्मद ८ समुद्र स्यो धि विष्टापि मनोरे ह्यिषि णोः। ओ हो र३ ज वा। मे त्सरो सो

मदा र३ हो यि। ओ हो र३ ज वा। च्युतो। अर३ हाँ वा॥ ॥मे त्सरो सो मा र३ दे च्यू र३४ तोः।

मो त्सरोः सो मद च्युत स्तरत्स मुद्र म्पव मा न ऊरे र्मि णो। ओ हो र३ ज वा। रो ओ दे व

कृ ता र३ ४ हो यि। ओ हो र३ ज वा। बृहो त। अर३ हाँ वा॥ ॥रो ओ दे व आ र३ ते म्बृ र३

४ हा त्रा रो ओ दे व कृत म्बृ ह दर्षो मित्र स्य वरुणस्य धारे र्मि णो। ओ हो र३ ज वा। ओ हि

न्वौनरुतार२३४ हो यि। ३ हो२३ ज वौ। ब्रह्मो हो त्। औ२३ हा वौ। हो ५ इ। डा॥ ॥१३॥ ।

॥ ॥ अग्नि वृहतीसोमः॥ ॥ प्रेहि न्वौ नाः॥ ॥ आत्मन्वृ२३४ हो त्। प्रेहि न्वौ नरुता

३। जवार३। वृ२३४ हो त्। वृ तिर्यि२३४ मा। णो हेय्यो तो विचा३। जवार२३४ हो२

ब्रह्मसाम॥

३४ णाः। रो डो दो२३४ यि वाः। सम्भृ३ औ जवार३। ड्री२३४ याः॥ ॥१४॥ ॥ इन्द्रा

वृहतीन्द्रः॥ ॥ अनीवर्त्तः॥ ॥ औ हो वा३ सो३ हस्व मा शा तो वा यू क्रो र त्थि। हि रो

ण्यो१ या२ यि। बो ह्मस्यु डो३१२३४। हि रयै इ। इ को यिशो१ यि ना२ः। वे हो न्हो सि

रो मे पा३ यि तो२३४५। यौ२३४ ५ यि॥ ॥ औ हो वा३ रा३ आ यि हि र ण्या या वो हो री

मेयूर श्रोयिपा१याँरा। शोयितिष्ट ष्ट्रो३१२३४। वेहतॉम्मा। ध्वी ओन्धारसोर:। विवे
ह्वो१णारि। स्येपा२यि। तो२३४५। योर३४५यि॥ ॥पिबा३ वेह्व वस्य गिर्वाणवा।
स्तेतस्यद्म। र्वपोओ१यिवा२। पोरि ष्ट्रतो३१२३४। स्येर सिनेइ। स्येमो। स्ते१तार यि:
वोरुमे१दारेऐपो२। ओ२३४५। तो२३४५यि॥ ॥१५॥ ॥कुद्धकविष्ठसाम्नागाय
त्रीसोम:॥ ॥कुद्धक वैष्ठ स्मम्॥ ॥तिस्रोऽ५वॉ। वा३ उदीरतायि। गोर्वामिमा
तिधेयिनो। श्वा२३:। हो वा३ हो यि। हरायिरो१यिती२३। हो वा३ हो यि। क नि। क्रा
रेदा२३४ औहोवा॥ ॥ऋताऽ५यिब्रा। ह्मा३यिरनूषता। योऽह्वीर्रतास्यमातो१रा

२३॥ हो वोर हायि। मे ज्ञो यो १न्नीर२३॥ हो वोर३ हा यि। दिवः॥ शारे यि शा र२३४
आ हा वा॥ ॥ रा यो ऽ५ स्स म्। के र३ ङ्गा ७ स्वै ते राः। अ स्म न्तो ७ सा। म वो यि श्वा
१ता र३॥ हो वो र३ हो यि। आ पा वा १ स्वा र३। हो वो र३ हा यि। स हो स्वा रे यि णा र२३
आर्नवेविनि पुत्तीनि॥
४ आ हा वा। दी र२३४ शा॥ ॥१६॥ ॥ वाकं कु प्सा मः॥ ॥ वाचस्साम॥ ॥ आ सा
ता पा। हो। रिषि ऊ वै ता ६ ए। अ म्भ नै स्तो। मो म स्पू रा र म्। रो ङा स्तु र म्। वो न प्स्वा
क्वा र३ म्। के र३ दा ३। पू ३४ ५ ता ६ हा यि॥ ॥ वै न प्स्वा ज्ञा म्। हो यि। त द प्सु ता
६ मो। सा ह स्व धा। रो ष्टु ष। ना र म्। पो यो दु र म्। पो य न्द्रा यि वा र३। यो र२३ ज्ञा ३

१२३

123

न्मोा३४५पनोइ हाँयि॥ ॥प्रियान्द्वा। हो। यैडन्म नाँइए। औ। र्तनेयः। औ। र्त

जातारः। वोयिर्वा ह्वे र्धा राँ जा दो १ यिवार३ः। औ। र२३ र्तो३म्। ह्व२३४५ होइ हाँयि।

॥ ॥१७॥ ॥सुज्ञान उष्ट्रि क्रसामः॥ ॥सुज्ञानम्॥ ॥सं र्खाय ज्ञा। निषीदेत।

पुनौ नोयार। प्रगाँ ऐता। शिशुन्नोयारा। ज्ञैः पोरारियिन्ने२३४ औ हो वा। षेत

श्रियए३॥ ॥सं मीव ह्साम्। नमा रेनायिः। स्रैडतोगारा। यसाधेनाम्। दिवावो

यारम्। मदेम्। आरेनोर२३४ औ हो वा। द्विशा वे सामइ॥ ॥पुनौ तौ दा। दूसाधना

म्। यैश्यो शोधरि। यवी तेयायि। यैश्यो मायित्रारा। यवेरूरेणा२३४ औ हो वा। ये श

त्नेसामरुतेपार२३४५॥ ॥१८॥ ॥दिवोदासःपरतष्क्रि कंसामः॥ ॥दैवोदासम्॥

।सैखो३१।यैञ्ञो३१२३४निषी।दो३ता।प्रुनो३१।नोयो३१२३४।प्रगा।यो३ता।प्रि

ष्ट३।म्।नैयो३१२३४।ङ्गिःपा।रो३यि त्वे।षेतो३१।श्रियो३।उ२३४वा॥ ॥सैमी३१।

वैत्सो३१२३४म्।नमा।त्वे३मोयिः।स्तैडो३१।तागो३१२३४।यसा।धो३नोम्।द

वो३१।वियो३१२३४म्।मदंम्।ञ्ञो३मोयि।द्विशो३१।वैसो३म्।उ२३४वा॥ ॥प्रुनो

३१।तादो३१२३४।त्वसा।धो३नोम्।यशो३१।शोद्वो३१२३४।यवी।तो३योयि।यैशो३

१।मित्रो३१२३४।यवा।रुद्रणा।यैशो३१।तमो३म्।उ२३४वा।ऊ२३४५पा॥ ॥१९॥ ॥अ

१२४

124

न्वीगुरनुष्टुप्सोमः॥ ॥आन्धीगवम्॥ ॥सुतासोमधुमधुमा१त्तामोः॥ सोमो

हाङ्ग्रीयार२३मो।कुम्मारा२र।दिवःपविच्चवान्तो।अक्रारा२३४५न्।दोयिवा३

ज्वा।गार२३हो।तूर२३वा।मदो।अ३हावा॥ ॥इन्दुरिन्द्रायपा।वातायि।इ

तिर्दा।वासार२३औ।कुम्मारा२र।कवन्वाचस्पतिर्मखस्यतो२३४५यि।वायि

श्वो३ज्वा।स्यार्यिशो।ना२३हे।जसो।अ३हावा॥ ॥सहस्रधारः।पा१वातायि।

समुद्रः।वाचार२३मो।कुम्मारा२र।खेयास्सोमस्पतीरयीणा१म्।सो।खो३ज्वा।इ

रस्य।दार२३यिवा।दिवा।अ३हावा।हो५इ।डा॥ ॥२०॥ ॥इति अर्द्धः प्रपाठकः॥ ॥

॥ ॥सामराज्ञो ज्ञातीसोमः॥ ॥स्वारसामराज्ञम्॥ ॥पवोहावो३न्तेवितत

म्म्रा।हेनएस्पोतारयि।प्रेभुर्ग्गो३र्ना।णिपरियायि।षिविश्वा३तारर्३ः।औतो ३

प्वा।ला।न्रेनेतोर२३४दो।हो।मा।औ।श्ञ्भू२३४तायि।हा३यि।शा।तो३साई त्वा।

वाहन्तोर२३४स्सा।हो।तो।दो३शाँ५ता६५६॥ ॥तोपो।हा।औ।पवित्रविततामू।

दिवस्पोदारयि।और्च न्तो।अस्यतन्तवा।वियस्क्षोयिरा२३न्रा।औवो२न्तीयो।

स्यापोवी२३४ता।हो।रमा।शो२३४वाः।हा३यि।दायिवा३ःपो।श्शोमू।औधीरार३

४हो।हो।तितार्३यिजौं५स्तो६५६॥ ॥अरो।हावो।रुचद्रुषसःपा।श्निरग्र्यो३यारः।

१२५

ओ३ क्रौ।मिमि।ति।त्रुवनायि।ष्ठुर्वा।ङो।यूर३ः।मो।यो।३ वाँयियि।नो।मो।मी।रेर३४ऽ ओ।हो।
स्यमोयो।र३४ यो।।हो।३यि।नोर्चो।र क्रौ।सोः।पो।यि।तो।रो।र३४ गो।।हो।नमो।३ दो।५
च उ र्यं द नि म. ध्यं दि नो।
धू।६ प६ः॥ ॥१॥ ॥अदारस्तृड्नर ह्वाडो गायत्री सामः॥ ॥अदारसृत्॥ ॥हौ।ज
पवस्वदा।ऋसारधेनारः।दे।वे।भ्यः पीतयारयिहो।रारयि।मरूर द्ध्रो।वारा।यो।वे।
मारेदो।र३४ औ।हो।वा॥ ॥हौ।ज सान्द्रवैः श्रा।नतारवोषीर।केवियुञ्ज निर्ंवधारयि
प्रो।यारः।पवारमोनारः।अदो।नारेयो।र३४ औ।हो।वा॥ ॥हौ।जपवमोना।धिया
रहोयितारः।अनियो।निङ्कः नारयि क्रो।दारत।धम्मारिणा वारा।युमो।सृरेहो।र३४

यि३

ओ। हो वा। ३ मध्वा॥ कुन्नाः उ वि न्त मौ। २३४५ मृ॥ ॥२॥ ॥ दशनाब्बृहतीसोमः॥ ॥ द
श्निनि॥ ॥ पॅरी।यिता२३र्षिञ्चतो सुत ६ हो ज्ञा सोमायेउ त्तमं ६ हविः दधन्वा
६।या२३ः। हो वा३ हो यि। कोरि यो ज्ञ। सुवो न्ता।रा२३। हो वा३ हो यि। सुषा वो। सा
२३। हो वा३ हो। मो मद्रिभिः। इडा२३ मो३४३। उ२३४५ इ। डा॥ ॥३॥ ॥ ऋनीशावा
बृहतीसोमः॥ ॥ उत्तरमानीशावम्॥ ॥ पॅरी। तॉ षिञ्चतो सुतम्। एए। सोमाय
उ।२३ तो मं ६ हा विः। दा२३४ धा। हो३ हो यि। वा ६। यो नार्य्यप्सुवन्ता। रो। स्व२३
ष्वा। हो३ सूयि। वो। सोम मा२३४ वा। ज्ञा५यि ना६ हो यि॥ ॥ सुषावा सोमद्रिभिः / १२६

राए। सुर्षावर्सो३मो मद्धि नोयिः। नॄ२३४नोम्। हो३हो यि। प्रेनोनो ३वि जिष्पा रि

स्वावो। ओ२र२३४दा। हो३हायि। ब्वा स्सुरे त्तो२३४वा। तोपाराइ हायि॥ ॥ अ्र दव्व स्सु

रमिन्त्तरएए। अदव्व स्सुऽ३रोमिन्न्तारेः। स्ते२३४ता। हो३हो यि। विर्त्वा ष्सुमर्दामा

अेन्धासो। श्रो२र२३४यिणा। हो३हो। तोगी। निरो२र२३४वा। तोपाराइ हायि॥ ॥४॥ ॥यु

धाजि ह्नूह नीसोमः॥ ॥याधजयम्॥ ॥श्रीणो३॥ तो३गा। त्तिः। ऊ तो२३४राम्

श्रो यि णो३। तो। गारि। त्तिरु३४५। तो२३४रा म्याथे रोयि स्वानोः। वो ह्वो। सिदारेयि। वैमो२

४पादो२३४नी कै रे२ः। ओयिन्द्रेिः। विचा३४५। हो२३४णोः॥ ॥५॥ ॥वसिष्ठु स्विष्टु

प्सामः ॥ ॥ द्वितीयद्वासिष्ठम् ॥ ॥ ऊकुवोयि । औस्यो३४ औहोवा । प्रेषा । हरमेना

। हूयमानाः । देवा३४ औहोवा । देवायि । नी३स्सेमा । ऋक्कारसाम । सुता३४ औहो

वा । पेवायि । त्वो३म्मेपरिषिक्तिरेनान्रमिता३४ औहोवा । वेसा । दो३पश्नो । मा३४३

ती३हापताद्द५६ ॥ ॥ नेद्धा३४ औहोवा । वेस्त्रा । समेनि । यावसानाः । मेहा३४ औ

होवा । केवायिः । निविचाना निशो८सोम्रः । आवा३४ औहोवा । ध्येस्वा । चमूवाः ।

हयमानाः । विचा३४ औहोवा । होणा । ऊरृविः । दो३४३यि । वा३वापयिताद्द५

६ना ॥ ॥ सेम्र३४ औहोवा । प्रियाम्र ऊपति । साना । ग्र्यायि । ऐशा३४ औहो

१२७

वौ।स्ता।रा।ये श्शो सॊम्र।द्दि।ता।ऽ३स्मौ।यि।ऽ३ भो।२३४ औ हो।वा।स्व रा।धुं नु वा।इ यमा
नाः।तंक्र वो।यि।यू यार३४ औ हो।वा।पी।ता।सुवे स्ति।भो।२३४३यि॥सो।२ दी।पना द्द्य पद्दः
ब्रह्मसाम
॥ ॥ ई॥ ॥इन्द्रो बृहतीन्द्रः॥ ॥ऽ३नीवर्त्तः॥ ॥ यौ।री।२ ज्यौ।२ चर्षणी।ना।वा।यो
ता।रे।ष्ठै।त्रि।रो।हू।१ यि गूरः।वो।यि श्श्वौ।सौ।३१२३४म्र।तं रु।तौ।हे तो।ना।१ना।२म्र।
ड्य ष्ठा।यो।वा।रि।ऽ३ हो।३।गो।२३४५।णा।२ऽ३४ पा यि॥ ॥ड्य ष्ठा।१ यो।२ हे ऽ३
हा।ष्टा।णा।वा।ड्यो।यि ष्ठ।यौ।हू।ऽ३ हो।गा।१णा।रि।यि।ऽ३ज्यो।यि न्द्रं त८ श्रो।३१२३४।नं पु
रु हा।न्मे न्नो।वा।१सा।२ यि।यस्या द्दू।१ यि ता।रि।विध्म।२।तो।२३४५।रो।२ऽ३४ पा यि॥ ॥१०

यस्यार३ ह्वा३यिता विधत्तेरावा। यो स्यहित्ता। विधौत्तोरा२रयि। होस्तनवोर१२२
४। ऊः प्रतिधायिदो प्रोशितारः। महान्दो१यिवरिः। नेष्ट३। रो२३४पा। यार२३४५पेः॥
त्रिष्टववतुर्थैदिवयाभिः।
॥ ।१७॥ ॥ऊर्णायुर्ग्गायत्रीसामः॥ ॥आद्यमोण्यवम्॥ ॥परिप्रियादिवःको
वीः। वेयो६सिनाम्यो हिताः। स्वानेयर२३ती। ओयार३इयार२ई३यो। केविक्रोतो
रे। यार२३४ओहावा॥ ॥सस्नुर्मातरःशुचीः। डो। तो डो। तेञ्जारा२ययातरा म्हे
न्मार२३ही। ओयार१इयार२ई३यो। तेता देधोरे। यार२३४ओहावा॥ ॥प्रेष्ठक्रायो १२८
यपन्योसायि। डेनायडुष्टो। ऊदुहाः। वीतियार२३षी। ओयार३इयार२ई३यो। पे

निष्ठ्रा यो रे। यो २३४ औ हो वा। ई२३४५॥ ॥ ५॥ ॥ सुज्ञानतष्ठिकसामः॥ ॥ सुज्ञा
नम्॥ ॥ सामः पुनानः सोमधारया। अपो वसानो अर्षसि। आरत्नधा योनिमृतस्य सीदसि। उत्सो देवो हिरण्ययः॥

पवे। मा रे नो २३४ औ हो वा। के नि क्रे दा द३॥ ॥ धीनि मृ जा। ति वाँ डि ना म्। वे नि
क्रो। यि डा रा। तम त्ये वा यि म्। ऋ जि त्रो यि पा रा। ष्ठ मा। ता रे यो २३४ औ हो वा। से म
स्वर ने ३॥ ॥ ऋ स र्जि का। ल श्रो ५ ऋ ना यि। मी ड्वो ऋ सो। त्ता र यिः न वाँ डे यूः। पु नो
नो वा रा। व ऋ्ते। ना रे यो २३४ औ हो वा। ऋ सि ष्णी दा द२ ३े पा २३४५॥ ॥ ६॥ ॥ वृष्णु
र नु ष्टु प्साम:॥ ॥ ऋ र्धि डित्वा ष्ट्री॥ ॥ पु रो जि ती वो ऋ न्धसः सो ऽ। सु ता य मा रो।

दे यो ३४५ यि । नो २३४ वा । अपश्वान ८ श्नथि ष्टो नो २३४ ॥ सखायो दो यि । घेडि

ह्वा २३ यो ३४३ म ॥ ॥ सखायो दीर्घे डि ह्वि यो म । प्या । धस्स्रे यारि । पा वो ३४५ । को

२३४ या । परिष्प्रस्येन्द्रतिसुता १ः । इन्दुरश्श्वाः । नेत्वा २३ यो ३४३ः ॥ ॥ इन्दुरे

श्वो नेत्वियाः । तान्दुरो ष्वरिम । ङ नो ३४५ यि । नो २३४ राः । साम विश्वा वि

यो धियो १ । यज्ञो यसा । तेवेह्वा २३ यो ३४३ः । ते २३४५ इ । डा ॥ ॥ १० ॥ ॥ लुशो ऊ

गतीसामः ॥ ॥ आद्यह्वो शम ॥ ॥ प्राङ् यासीता इन्दुरिन्द्रा २३ । स्या ३ जिष्णुते

मू । सखास कथुः । नेप्रमिना २३ । तीर सद्भिः र म । मथ्येइ वा युवतिना २३ यिः । सो ३ मे

षति। सोमः कला। शो शा तया२३। मनो३पा५थो६५६॥ ॥ द्रो णा धियः। मेन्द्र युवो

२३। वो३यि पन्थाव:। पनेस्थाव:। सेवरणा२३यि। श्र३वेक्तो मु:। हरिश्चीडे। तेम

श्या नू२३। षा३तेस्तु नः। श्रतिधिना। वे:पयसा२३यित। श्रो शो३यि श्रा पयू६५६:

॥ ॥ श्रो ना स्सो मो। सश्रुतम्पा२३यि। शृ३षी मि षम्। इन्द्रो पवा। स्वपवमा२३नो

३ऊर्मिणा। याना। रहे। तत्रिर ह्वा२३न्। श्रा३ सश्रुषी। हुमेह्वा ऊ। वेन्मधु

इतीयमुक्तं। वीकेनसहविकल्पः।

मा२३ता। सुवो३यिरा पया६५६म्॥ ॥११॥ ॥इन्द्रोनुष्टुविन्द्रः॥ ॥एडस्तुह्वास्तु

हीयम्॥ ॥एतोन्विन्द्रꣳ स्तवा३मो। स्तुद्धꣳ स्तुहि। नासो म्नारा। स्तुह्वायिरे२ क्तो३

यि:॥ वाँवारे धे॑रि२३४५ सामस्तु द्विरा२३शी । वोन्मा ऌ इडा२३॥ ॥इन्द्रस्तु

द्धाँज ऽञ्ञाँगा२ह्लीस्तु द्वे स्तु द्वे॥ निरँ ॥ तो यिमरयि: ऽआह्वारा२३यी२म्र । निधा

रे रा२३४ यॉ । स्तु द्धाँ मा२३ मो । क्षी सॉमियाइडा२३॥ ॥इन्द्रस्तु द्धाँ हि नॉ रा२३यी

म्रा स्तु द्धाँ र त्नॉ । निर्दो । स्तेषा२यि । स्तु द्धा वो२चो३ । णो डारेयि र्ग्नौ२३४ सा यि

तृतीयानि

निं०

स्तु द्धाँ वा२३ डॉम्र । सो यिषाँ सैंसि । इडा२३ नो३४३ । उँ२३४५इ । डा॥ ॥१२॥ ॥प्र

प्रजापतेर्मेदेनि मध्येदृिते

जापतिर्गायत्रीसाम:॥ ॥सन्तनि॥ ॥ऋषा हो जा । सोम द्धो मा२१ जवा२३ । ता १३०

२३४ मा: । ओं निं द्धा णा निरॉ रा रु वॉ२३४५ पत । सी दान्धो जा । या नो वो ना२१ जवा२३ यि

षू२३४वा॥ ॥अप्साइन्द्रायेवायवेवेरुणायमरुद्भियार२३४५ः।सोमाहोऽ।
आर्षन्तुवा२१ऊवा२३यि।क्षा२३४वा॥ ॥इषान्ता कायनादेधदेसमब्धुः।सो
वमविश्ववतोर२३४५ः॥आपाहोऽ।वोख्वसेहा२१ऊवा२३।स्त्री२३४णाम्॥ ॥३॥ ॥
मनुर्व्रहतीसोमः॥ ॥मानवोत्तरम्॥ ॥हावायि।अग्निःसोमासेञ्जायेवेः।हो
वायि।पावान्तमद्यम्मदम्।सोमुद्गस्या।धा।विष्णुपा२१यि।मनारेयिषो२३४यि
णाः।मत्सोरा२३सोर२ः।मोरेदा२३४औहोवा।चू२३४त॥ ॥हावायि।मत्ससूसो
मेदच्युतः॥हावायि।मात्सरा।सोमदच्युतः।तारहेसपुद्गोम्पवमो३॥नेजरेमी

२३४यि णा। रौं डो दा २३ यि वो ३:। औ रे तो रि २३४ औ हो वा। हू २३४ हो त॥ ॥ होवा
यि। रा डो। दि वे रु ते म्म्हृ हे ता। हा वा यि। रा डो। दि व रु त म्म्हृ ह त। ओ र्षो मि त्रा स्यो
वे रु णा ३१। स्य धा रे मो रि २३४ णा। प्रे हो यि न्वा २३ नो ३:। औ रे तो रि २३४ औ हो वा। हू २३
४ हो त॥ ॥१४॥ ॥ आनूपो बृहती साम:॥ ॥ आनूप वा ह्मृ ष्ट्वम्॥ ॥ ओ नो ओ नो।
सो मो स ऽ३ औ यो १ वा र:। पो वान्ति म। दि यो म्मो १ दा र म्। सो म्म्हृ २ द्वो स्या र। धि वि
। ष्टृ पे मे नी। षा २३ यि णा:। म त्सो रा २ सो ३:। मो २३ दा ३। यू २३४५ ता ६ हो यि॥ ॥ मे

त्सो मे त्सो। रा सो म ऽ३ दो यू १ ता र:। मो त्स रा स:। म दो यू १ ता र:। तो रा र त्सो म्म्हृ र।

इम्मप वर्मानेऊ र्मा२३ यिणो। राँजादो३ यिवौ ३ः। ओ२३ ४तौ३म्। हूँ२३४५ हा इ
हाँयि॥ ॥ राँजो रौजो। दैवरू ऽ२ तौ हूँ १ हा२ रत्। रो। जोदैवः। रुतौ म्हूँ। हा२रत्।
ओषरिमा यित्रौ। रा। स्त्रैवरु णस्यै धर्म्मा२३ णा। प्रे हायिन्वौ ३ नौ ३ः। ओ२३ ४तौ ३म्।
हूँ२३४५ हा इ हाँयि॥ ॥१५॥ ॥ वम्रो बृहतीसामः। वाम्रम्॥ ॥ ऊँतीसामौसे
औ। हो३ हो३ यि। यो२३४। वौ या वा वौ। पेवा हा२रा। तिमाहा२रा। दोये म्मादा२ रम्। से
मुद्रे स्यौ। धिवो यिष्ठा पोमे नो ऊ वा३। ऊ३४ पा। षि णा२ः। मोत्सा२रो सा२ः। मदो च्यू
रितौ२३४ औ हो वा॥ ॥ मत्सरा सामदौ। हो३ हो३ यि। च्यू२३४। तन्म्यू। तावौ। मे

त्सा। हारयि। रौं सा। हारा मोदच्यूतारः। तोरत्सेमु। द्रेम्म्पा वा मौ। नेश्री। ऊवाइ।
ऊ३४पो। मि णोरा। रोडारदो। यिदारः। ऋतेम। ह्रूरे हो२३४औ। होवा॥ ॥रौडादि
वैरु तेम। हो३हो३यि। ह्रू२३४। हह्रू। हावो। रौं डा। हारयि। दैंवा। हारा। श्रौतेह्रू
हारत। श्रौर्षोमित्रा। स्य वो रू णो। स्य धे ऊवाइ। ऊ३४पो। मे णोरा। प्रो हारयिन्द्रो
नारः। ऋतेम। ह्रूरे हो२३४औ। होवा। ऊ२२३४पो॥ ॥१३॥ ॥अङ्गिरसो वसिष्ठ
स्य वात्रि कृष्णसाम॥ ॥सम्पा॥ ॥उ३हो यि। उ३हो। उहो। इ या रा। उ३हो३ए।
श्रनित्रिपा। घो३ ह्रूषा। णो वोयों। धेम। श्रङ्गिराषि णाम्। श्वेवोवा। प्रा न्वेवारौः। नै

नाँवसा। नो२वेरु। एा। नेसिन्धूः। विरत्नधाः। दैयाँर्तां। वो३४३। री२याँप ए।ऽ६५

ऽयि॥ ॥स्त्रेर ग्ग्याँमाः। सेर्व्वीरस्सहाँवान्। ऽङ्कतोँपवा। स्वो२से निताँधनाँ

नीः। तिग्मायुधः। क्षिप्रधा। न्वोसमत्सू। अषाँढस्सा। को२न्वेत। नो३४३। स्वे

३शाँप त्रूऽ६५ऽ६न्॥ ॥उरुगव्यूतीर२रन्ता। याँ नि हँ सेवान्। समीचीना। औ२पेवा।

खापुर। न्धी मध्र प्रैस्सषा। सो२नुषा। सेस्सुवँर्ग्गाः। उ२हाँयि। उ२हाँ। उ२हाँ। ऽइया

रा। उ२हाँ। २ए। सञ्जि क्रादा। मँहाँ औ। स्मा३४३। न्यो२वाँपजा। ऽ६५ऽ६न्॥ ॥२७॥

पंचमत्रेतसाम॥

इन्द्रो हतीन्द्रः॥ ॥अनीवर्तः॥ ॥उवा२मा२यिन्द्रय शाँ औ सावाँ। औऽङी

षीशा। वसो। स्पा१ता२यिः। ह्वेववृत्रो।१२३४। णो। ह्र ७ स्यप्प ती निया। श्रे। औ। यि। त्सू

१रूरा। ञ्ज। नू तौ१ श्वा२रि। षै। णो३यि। धो२३४पा। तौ२३४५ यिः॥ ॥ ञ्ज नूर तौ२ श्वा षि

णी ध्रु ता वा। औ। नु तै श्वा। षणा यि धो१ ता२यिः। तो म्रु त्वा नू३। २३४। नै म स्तु रा। प्र

चो यि तौ१ सा२ म्रा। रा। धि। ता१ गा२ म्रा। इ वो३ यि। मो२३४पा। हो२३४५यि॥ ॥ रा। धि

३ तौ३ ग मि वं म हो। वा। रा। धि। तौ ग म्रा इ वो यि मो१ हा२यि। मो। ही व को। ३। २३४।

ति प्रशा२ णा। त। औ। औ१ यिन्द्रा२। प्रतो यि स्तै१ म्ना२रि। ना। औ। ३। म्नो२३४५। वो२३ १३३

पंचमार्षवे॥

४५ न्ना॥ ॥१८॥ ॥गोष्टुक्तिर्ग्गायत्रीसामः॥ ॥गोष्टुक्तम्॥ ॥ श्रे सा ध्ये ७ स्तु र्म्मा।

133

हौहोवाहोयि। दौयो। श्रे प्रसु दान्क्रौ गिगीरा कुवायि कुवारयि ष्वारः। स्ये
नौनायांनिमोरा कुवायि कुवारयि। सोदार२३त। होरे वा२३४ औहोवा॥ ॥ सुत्रे
माध्वांद वौ। होहोवाहोयि। वांतामू। श्रे प्रसु घ्नेतन्ने। त्नोरा कुवायि कुवारयि
।स्रेतारमू। स्वेदन्तिगांवेः पारा कुवायि। कुवारयि। योना२३यिः। होरे वा२३४
औहोवा॥ ॥ श्रांदीमश्व न्नेहौ। हौहोवाहोयि। तांरामू। श्रस्तृ सुनन्नोमारा।
कुवायि कुवारयि। तो। यांरा माधार सड सेघ्नारा कुवायि कुवारयि। मोदार३
यि। होरे वा२३४ औहोवा। श्रे ग्निरा कुतो२३४५ पेः॥ ॥१०॥ ॥सुज्ञानत्रष्टिक्सा

सः॥ ॥सुज्ञानम्॥ ॥पौ ण्णा श्शिश्रः। महीनाम्। हि न्वा नोतरिरास्यदीधिताये

म्। विश्वी पारारयि। प्रियोन्नरेवोर२३४औहोवा। ऐधद्भृतए३॥ ॥ठेपत्रिता।

स्यपोषियाः। ऐन क्रोयारत। गुर्होपेदाम्। यैज्ञास्योसारात्त धौ। मारेनोर२३

४औहोवा। ऐ धप्रियामए३॥ ॥त्रीणित्रिता। स्य धौरेया। दोष्ठुष्वेवारयिरय

द्धयायिम्। मिमीतेज्ञारास्यायो। ज्ञारिनोर२३४औहोवा। विसुक्रोऽतार२३ठेपार२३

४५॥ ॥२०॥ ॥दिवोदासः परउष्णिक्कसामः॥ ॥दिवोदासम्॥ ॥प्रो णा३ श्शिश्रः

